M.A. Sanskrit
Year – I
Semester – II
Paper - V

# मेघदूतम्
# Meghadutam

## Centre for Distance and Online Education

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey
R.K.Pirakas

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from Centre for Distance and Online Education (CDOE)**

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संसकृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# मेघदूतम्

# Meghadutam

## पाठ्यपरिचयः

"काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् " इति लोके प्रसिद्धवचनानुसारेण काव्यस्य वैशिष्ट्यं महद्वर्तते। काव्यं च अनेकविधं भवति महाकाव्य-खण्डकाव्य-गद्यकाव्य-पद्यकाव्य-चम्पूकाव्यादिभेदात्।तेषां लक्षणानि च लक्षणग्रन्थेषु विवृतानि भवन्ति। इदं मेघदूताख्यं काव्यं सन्देशात्मकं खण्डकाव्यं भवति। अत्र श्रृङ्गाररसस्य प्राधान्यं वर्तते, तत्रापि विप्रलम्भस्य भावः सम्यग्वर्णितः। आदौ कविपरिचयः काव्यपरिचयः च संग्रहेण क्रियते तेन च कवीनां यशः वर्धते छात्राणां च कवेः महत्वं ज्ञायते। अस्य काव्यस्य विषयः तावत् विरहपीडितस्य यक्षस्य अलकापुर्यां विद्यमानायाः स्वपत्न्यः कृते मेघद्वारा संदेशप्रेषणम्। आदितः कातिपयश्लोकेषु अलकापुर्याः वर्णनं तथा तत्रत्यानां स्त्रीणां प्रासादानां यक्षाणां च वर्णनं कृतं भवति। ततः क्रमेण स्वविलापं प्रियया संपादितसंभिगस्य वर्णनम्, तया सह मेघस्य वार्तालापः, स्वस्य शापशमनानन्तरमागमनं भवति इति सूचनमिति रीत्या श्रृङ्गाररसगर्भितं काव्यमिदं भवति। अस्य काव्यस्य अध्ययनेन छात्राणां संदेशकाव्यविषये ज्ञानं भवति, तथा श्रृङ्गाररसस्य गुणाः अपि ज्ञायन्ते।

## प्रथमखण्डपरिचयः

अस्मिन् खण्डे महाकविकालिदासस्य सङ्क्षेपेण परिचयः क्रियते। तथाहि- तस्य जन्मस्थानविषये विवदन्ते बहवः। अतः तस्य स्थानं किमिति ज्ञापनाय सः विचार्यते। ततः तस्य कालविषयेऽपि विवदन्ते बहवः, अतः तदपि अत्र विचार्यते। विद्यमानेषु अनेकेषु

काव्येषु मेघदूतस्य किं वैशिष्ट्यमिति सूच्यते। ततः प्रकृतपाठस्य उत्तरमेघस्य कथासारः च भवति।ततः परं अलकापुरीवर्णनात्मकदशश्लोकाः भवन्ति। अनेन छात्राणां कालिदासविषये तस्य कवितायाः विषये ज्ञानं भवति।

## द्वितीयखण्डपरिचयः

अस्मिन् खण्डेऽपि आदौ अलकापुर्याः वर्णनमेव भवति। तत्र एकह कल्पवृक्षः भवति सः अलकावासिनीनां रमणीनां सर्वाणि श्रृङ्गारवस्तूनि प्रयच्छति इति आरब्धम्। ततः क्रमेण सा पुरी वर्णिता। एवं तत्र वापी अस्ति, तस्य तटे क्रीडाशैलः अस्ति इति रीत्या तत्र विद्यमानानां क्षेत्रादीनां वर्णनं भवति। अनेन खण्डेन छात्राणां कृते विविधक्षेत्राणां ज्ञानं भवति।

## तृतीयखण्डपरिचयः

अस्मिन् खण्डे पतिवियुक्ता यक्षप्रिया दुःखपरिपूर्णं जीवनं धत्ते तां पश्येति मेघस्य कृते पत्न्याः विलापं मेघाय दर्शितवान्।ततः क्रमेण तस्याः मुखदैन्यादिकं वर्णितम्। अस्य खण्डस्य अध्ययनेन छात्राणां श्रृङ्गाररसस्य विप्रलम्भभागः स्पष्टतया ज्ञानं भवति।

## चतुर्थखण्डपरिचयः

अस्मिन् खण्डे पत्न्या सह कथं किं च भाषणीयमिति मेघस्य कृते उपदेशं करोति यक्षः। अत्र नूतनानि अनेकानि पदानि प्रयुक्तानि कविना।यक्षस्य विरहोऽपि अत्यन्तं गहनरूपेण निरूपितः। अस्य खण्डस्य अध्ययनेन छात्राणां श्रृङ्गाररसस्य भावः स्पष्टं जानन्ति। तथा कवेः चातुर्यमपि अवगच्छति।

## पञ्चमखण्डपरिचयः

अस्मिन् खण्डे आदौ कतिपयश्लोकैः मेघस्य पत्निवियोगजनितशोकं प्रदर्श्य तद्वारा संदेशकथनकालेऽपि विरहतापं प्रदर्शितम्। अन्ते संदेशं समाप्य मासचतुष्टयानन्तरं शापनिवृत्तिः भवति अतः तावत् कालं प्रतीक्षां करोतु इति पत्नी कृते सन्देशं मेघद्वारा प्रेषितवान्। अस्य खण्डस्य अध्ययनेन छात्राणां यक्षस्य शापनिवृत्तिः कथं जाता इति ज्ञानं भवति।

| खण्डः | विषयः | पुटसंख्या |
|---|---|---|
| प्रथमखण्डः | काव्यपरिचयः,कालिदासपरिचयः,तस्य जीवनवृत्तान्तम्, कालः, मेघदूतपरिचयः, उत्तरमेघकथासारः,उत्तरमेघे १-१० श्लोकाः | 8-25 |
| द्वितीयखण्डः | उत्तरमेघे ११-२० श्लोकाः | 26-37 |
| तृतीयखण्डः | उत्तरमेघे २१-३० श्लोकाः | 38-50 |
| चतुर्थखण्डः | उत्तरमेघे ३१-४० श्लोकाः | 51-63 |
| पञ्चमखण्डः | उत्तरमेघे ४१-५३ श्लोकाः | 64-79 |

# खण्डः १

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. पदच्छेदः
    2. अन्वयः
    3. तात्पर्यम्
- सारः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्मिन् खण्डे आदौ कालिदासस्य चरित्रवर्णनं क्रियते। तथाहि- कालिदासः कदा उत्पन्नः, कुत्र आसीत्, कति ग्रन्थाः अनेन रचिताः, कस्मिन् स्थाने आसीत्, कस्य राज्ञः कविः आसीत्, उपाधयः के इत्यादीनां विषये विचारः कृतः। अनन्तरं मेघदूतकाव्यस्य वैशिष्ट्यं संग्रहेण प्रतिपाद्यते। ततः प्रकृतपाठ्यक्रमस्य उत्तरमेघस्य कथासारः संगृहीतः। ततः परम् उत्तरमेघस्थप्रथमदशश्लोकाः पाठ्यन्ते।

तत्र यक्षः स्वप्रियायै सन्देशं प्रेषयितुं मेघं अलकापुरीं प्रेषयति। तत्र अलकापुर्याः वर्णनं यक्षेण कृतं विद्यते बहुभिः श्लोकैः।

## उद्देश्यम्

- कालिदासस्य जीवनवृत्तान्तस्य परिचयो भवति
- श्रृङ्गाररसविषये ज्ञानं भवति
- विप्रलम्भाख्यश्रृङ्गारस्य गुणाः ज्ञायन्ते
- सन्देशकाव्यस्य महत्वं ज्ञातुं शक्यते
- ऐतिहासिकविषयेषु ज्ञानं प्राप्नोति

## कालिदासस्य परिचयः

कालिदासः महाकविः वर्तते। सः कविकुलगुरुः इति प्रसिद्धः। ऐतिह्यानुसारं सः विक्रमादित्यस्य नवरत्नेषु अन्यतमः आसीत्। तस्य नाम काल्याः दासः इति समासात् व्युत्पद्यते।

कालिदासः रघुवंशं, कुमारसंभवं, मेघदूतम् खण्डकाव्यं च इति त्रीणि श्रव्यकाव्यानि रचितवान् । अभिज्ञानशकुन्तला, विक्रमोर्वशियां, मालविकाग्निमित्रं च इति त्रीणि दृश्यकाव्यानि अपि निर्मितवान् । केचन जनाः मन्यन्ते यत् सः ऋतुसंहारः इति काव्यं श्यामलाष्टकादीनि काव्यानि अपि रचितवान् । केचन जनाः कालिदासत्रित्वस्य विषये अपि वदन्ति ।

## कालिदासस्य जीवनम्

कालिदासो हि परम्परासमर्थको भारतीय आसीद्,यो हि सनातने धर्मे मनागपि परिवर्तनं वोपेक्षणं नैव सहते। तेनैव सोऽभिज्ञानशाकुन्तलस्य मङ्गलाचरणपद्ये बौद्धसम्मतनिरीश्वरवादनिरासाय 'प्रत्यक्षाभिः प्रपन्नस्तनूभिः' इति कथयति ।स तु देवत्रयस्यैकान्तैक्यं समर्थयति । यथा मङ्गलपद्ये शिवः कुमारसम्भवे

(२ सर्गे ) ब्रह्मा, रघुवंशे (१० सर्गे), विष्णुश्च स्तुताः सन्ति । प्रत्यभिज्ञावादी स साङ्ख्ययोगावपि तथैवाद्रियते । वेदेषु परमश्रद्धा, पुनर्जन्मवादः, ईश्वरस्य जगत्प्रणेतृत्वञ्च कालिदासस्य जीवनदर्शनस्य केचित्पक्षाः ।

## कवेः देशः

कालिदासस्य जीवनवृत्तिविषये बहुविधाः लोकविश्रुतयः अनेके वादाः अपि सन्ति । केचित् एनं विक्रमादित्यस्य सभायां कविः इति आमनन्ति । केचित् गुप्तकालीननरेशाणाम् आश्रयं प्राप्तवानिति कथयन्ति । धारानगरे भोजराजस्य सभायां कविरत्नपदभूषितः अभूत् इति कथाकोविदाः वदन्ति। ऐतिह्यानुसारं बाल्यकाले सः अतीव मूर्खः अवर्तत । विद्याधरया सह तस्य विवाहः अभवत् ।ततः कालिदासः कालीदेव्याः वरप्रसादेन विद्वान् अभवत् इति । इयं कथा कालिदासस्य प्रतिभया कविताचातुर्येण अपि जाता तथ्या तु न इति विदुषां मतिः ।

मेघदूते अन्यासु कृतिषु सः पुनःपुनः उज्जयिन्याः सौन्दर्यं वर्णितवान् अतः सः तत्रैव बहुकालम् उषितवान् स्यात् । काश्मीरे प्रवर्धमानस्य केसरपुष्पं सः केवलं वर्णितवान् इत्यतः काश्मीरीयः स्यादिति केषाञ्चित् अभिप्रायः । तेन मेघदूते निर्दिष्टः रामगिरिः विदर्भे भवति । रघुवंशमहाकाव्ये तेन वर्णितं रघोः दिग्विजयं सूक्ष्मतया परिशीलयामश्चेत् भारते तस्य अपरिचितः प्रदेशः नास्तीति स्पष्टं ज्ञायते । यथा असमप्रदेशम् अवर्णयत् तथैव मनोहरशैल्या केरलमपि अवर्णयत् । हिमालयमिव समुद्रतीरमपि सुन्दरम् अवर्णयत् । अतः सः राष्ट्रकविः, उज्जयिनी तस्य स्थिरस्थानम्, समग्रभारतं तस्य चरस्थानम्, अतः समग्रभारतमेव तस्य प्रदेशः इत्यपि वक्तुं शक्यते ।

## कालः

आभारतीया भारतीया वा कविवरमिमं नवीनतमं प्राचीनतमं वा कल्पयन्तु नाम, किन्तु अस्य कृतिभिः एतस्य स्थायि यशः न मनागपि हीयते। अस्य कालविषये तु प्राधान्येन।

१ तत्र प्रथमं क्रिस्ताब्दतः पूर्वं प्रथमशताब्द्याम्।

२. द्वितीयं क्रिस्ताब्दतः पश्चात् पञ्चमशताब्द्याम्।

३ तृतीयं क्रिस्ताब्दतः पश्चात् षष्ठशताब्द्याम्।

तृतीयस्य प्रवर्तकः फर्गुसनमहोदयः आसीत्। एतस्य कथनम् भवति यत् ५४४ क्रिस्ताब्दे विक्रमादित्यपदलाञ्छनेन केनापि राज्ञा हूणाः विजिता। मतमिदं मैक्समुलरः अपि स्वीकरोति । डा. हार्नलीमहोदयः कथयति यत् महाकवेः कालिदासस्य आश्रयदाता यशोधर्मानृपतिः षष्ठ शताब्द्याम् आसीत्। अनेन कविना तस्य यात्रावर्णनव्याजेन रघोः दिग्विजययात्रा वर्णिता इति।

कालिदासो हि रघुवंशे षष्ठसर्गे इन्दुमतीस्वयंवरप्रसङ्गे राजवर्णनक्रमे प्रथमं मगधेश्वरमेव गृह्णाति वर्णयति अपि तदुत्कर्षं यथा स मागध एव स्यात्, किन्तु तत्सम्मतः परन्तपो नाम मागधो राजा न कुत्रापि पुराणेष्वपि श्रुयते। रघुवंशे एवं चतुर्थसर्गे मगधं वा पुष्पपुरं पुनर्नामतोऽपि न स्मरति। स हि मालविकाग्निमित्रे विदर्भान् हि दशार्णानामधीनस्थराज्यत्वेन वर्णयति यत्र हि यज्ञसेनमाधवसेनयोः द्वैराज्यं स्थापितमस्ति। रघुवंशे तु 'सौराष्ट्ररम्यानपरो विदर्भान्' इति पृथगेव स्वतन्त्रराज्यरूपेण स विदर्भान् स्मरति। अपरञ्च, अग्निमित्रसमये साकेतप्रदेशो मगधानामन्तर्वर्तिप्रदेश आसीत्। रघुवंशे तु स साम्राज्यकेन्द्रत्वेन वर्णितोऽस्ति। तेन हि रघुवंशस्य प्रणेता कालिदासोऽग्निमित्रसमकालिक इति नैव सर्वतोभावेन सङ्गच्छते।

रससिद्धस्य अस्य कवीश्वरस्य महिमा तदीयकाव्यैः एव ज्ञायते । तस्य काव्यस्य परिशीलनेन वेदशास्त्रपुराणेषु तस्य अगाधं पाण्डित्यम् आसीत् इति ज्ञायते । कल्पनाचातुर्यं पदानां माधुर्यं, पात्रसंविधाननैपुण्यं, रसोल्लासः, ललितानि मनोहराणि वचनानि इत्यादिभिः सुगुणैः अस्य कवेः काव्यानि सर्वजनादरणीयानि । कालिदासः भारतीयसंस्कृतेः प्रतिनिधिः कविरिति सुधीभिः पुरस्कृतः । अस्य रचनाः चतुर्वर्गपुरुषार्थानां प्रदानसाधनस्वरूपाः इत्यपि स्वीकृतं सरसान्तःकरणैः संख्यावद्भिः । अयं महाकविः वैदर्भीरीतेः सम्राट्, प्रसादगुणपरिपूर्णैः, अनुपमोपमाप्रयोगप्रजापतिः प्रकृतिचित्रणचित्रकारः, व्यञ्जनाव्यञ्जितशास्त्रकलेवरः, अभिनवकल्पनाकुशलः, अन्यतमः काव्यशिल्पी विराजते - सभाभास्वरो

भास्करः, वाणीवरदवत्सः, भूमातुर्मौलिमुकुटहीरकः, धन्योऽयं कविमूर्धन्यः, स्वकीयकुलकेतनः, सर्वतन्त्रस्वतन्त्रः, सकलशास्त्रासारनिश्यन्दः, काव्यकोशविकासविभाकरः, वैदर्भीरीतिसभाजनसभ्यः, प्रसादगुणालम्बनः, उपमासीमन्तिनी-सीमन्तसिन्धूरदानसरसः, कविताकामिनीविलासः, काव्यरचनाविक्रमादित्यः, श्रीविक्रमादित्य कविकादम्बकदम्बसमाराधितपादपद्मः, मुकुटालङ्करणारहितोऽपि सार्वभौमः, कविकुलगुरुः, कविचक्रवर्ती, प्रकृतिनटीनिर्वचनचतुरः विद्योत्तमाद्योतितान्तःकरणः, समर्चितकालिकाचरणः, व्यासवाल्मीकिप्रभृतीनाम् अवरजः, विश्वविश्रुतकीर्तिः आसीत् महाकविः कालिदासो नाम ।

## मेघदूतस्य वैशिष्ट्यम्

काव्यजगति 'लघुत्रयी' रूपेण कुमारसंभव-रघुवंश-मेघदूताभिधासु कृतिषु अन्यतमं 'मेघदूतम्' इति कृतिरियं यद्यप्याकृत्या लधीयसी तथापि महीयसी भौगोलिकरीत्या मेघगमनमार्गवर्णनपुरःसरं ललितं श्लेषाश्लेषसहितं शब्दार्थसौष्ठवं दधत्या काव्यरचनया प्रतिमाति । मेघदूतं खण्डकाव्यमस्ति, यस्य रचयिता महाकविः कालिदासः काव्यमिदं पूर्वमेघदूतम्, उत्तरमेघदूतम् इति खण्डद्वये विभक्तमस्ति । काव्येऽस्मिन् काचित् विरहेण पीडितस्यैकस्य यक्षस्य कथाऽस्ति । यक्षः कुबेरस्य सेवकः आसीत् । सः स्वकार्येषु प्रमत्तः अभवत् । कुबेरस्य शापेन सः एकवर्षपर्यन्तं रामगिरिपर्वते न्यवसत् । तत्र अबला विप्रयुक्तः स कामी यत्र यत्र पश्यति तत्र तत्र कामोद्दीपकवस्तूनि सम्पश्यानः अस्वस्थः सन् अस्तं गमितमहिमा भूत्वा कृशः भूत्वा कनकवलयभ्रष्टः भूत्वा रामगिरेः विजनगुहासु वासम् चक्रे। एवम् विरहकातरः सः सानुम् आश्लिष्यमाणम् वप्रक्रीडाम् कुर्वाणम् गजसदृशम् च प्रेक्ष्यमाणम् मेघम् पश्यति। यद्यपि मेघः धूमज्योतिसलिलमरुत्भिः निर्मित; अचेतनः स कामातुरः न्यायाऽन्यायचिन्तने असमर्थः सन् स्वप्रेयसीं प्रति मेघद्वारा संदेशं प्रेषयति ।

गम्यमाने सति मेघेन कः कः मार्गाः स्वीकरणीयाः , के नगराः ग्रामाः च मार्गे सन्ति के के दृश्याः, द्रष्टव्याः कथम् तेषाम् अवगतिः इत्यादयः पूर्वमेघस्य विषयाः । रामगिरेः आरभ्य उत्तराभिमुखे गते अमरकूटपर्वतं नर्मदानदी, विदिशानगरी, वेत्रवतीनदी, माल्वस्य राजधानी, कुरुक्षेत्रम् इत्यादयः द्रष्टव्याः इति च उपदिदेश।ततः पूर्वमेघे कतिपयनगर्यः निरूपिताः।

## उत्तरमेघकथासारः

प्रकृते च पाठ्यक्रमे उत्तरमेघः एव वर्तते। तत्र च अलकापुर्याः वर्णनात् कथा आरभ्यते।"हे मेघ त्वं अलकापुर्याः विद्यमानेषु उन्नतप्रासादेषु गत्वा वृष्टिं समर्पय। तस्मिन्प्रासादे सुनदरस्त्रियः सन्ति। तत्रैव चित्राणि अनेकवर्णखचितानि विलसन्ति। तत्र भवतां गर्जनं भवति प्रासादे च मृदङ्गघोषः भवति।भवान् तु नीलजलविशिष्टः प्रासादस्तु मुक्ताविशिष्टः। त्वं तु उपरि सञ्चरसि स तु उपरि पर्यन्तं विस्तृतः भवति"-इति क्रमेण प्रासादमेघयोः तुलना कृता यक्षेण। ततः क्रमेण स्वविलापं प्रियया संपादितसंभिगस्य वर्णनम्, तया सह मेघस्य वार्तालापः, कथं स पत्नीवियोगात् प्रललाप इति सूचनमिति रीत्या श्रृङ्गाररसगर्भितं काव्यमिदं भवति। अस्य काव्यस्य अध्ययनेन छात्राणां संदेशकाव्यविषये ज्ञानं भवति, तथा श्रृङ्गाररसस्य गुणाः अपि ज्ञायन्ते।

अन्ते च "मासचतुष्टयानन्तरं शापस्य शान्तिः भवति तावत् कालं कथंचित् क्षमया तिष्ठ" इतीमं सन्देशं मेघद्वारा प्रेषयति यक्षः इति कथायाः शान्तिः भवति।

# उत्तरमेघदूतम्

**विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः**

**सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।**

**अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः**

**प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ १॥**

**पदच्छेदः**-

विद्युत्वन्तम्, ललितवनिताः, सेन्द्रचापम्, सचित्राः, सङ्गीताय, प्रहतमुरजाः, स्निग्धगम्भीरघोषम्, अन्तस्तोयम्, मणिमयभुवः तुङ्गम्, अभ्रं लिहाग्राः, प्रासादाः, त्वाम्, तुलयितुम्, अलम्, यत्र, तैःतैः, विशेषैः ।

**अन्वयः** –

यत्र ( अलकायां ) ललितवनिताः सचित्राः संगीताय प्रहतमुरजाः मणिमयभुवः अभ्रंलिहाग्राः प्रासादाः विद्युत्वन्तम् सेन्द्रचापं स्निग्धपर्जन्यघोषम् अन्तस्तोयं तुङ्गं त्वां तैः तैः विशेषैः तुलयितुम् अलम्।

**तात्पर्यम्** –

हे जलद ! अलकां पुरीं संप्राप्ते त्वयि तत्रत्यानि हर्म्याणि ललितवनिता-चित्रतौर्यत्रिकनिमित्तकताडितमृदङ्गमणिमयभूतलाभ्रंकपशिखरप्रमुखधर्मैः समानधर्माणि वर्त्तमानानि क्रमेण विद्युदिन्द्रचापश्राव्यगम्भीरघोषान्तर्जलतुङ्गत्वधर्मसहितं त्वां तुलयितुं समर्थानि भविष्यन्ति ॥ १ ॥

**हस्ते लीलाकमलमलके बालकुन्दानुविद्धं**

**नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।**

**चूडापाशे नवकुरबकं चारु कर्णे शिरीषं**

**सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ २॥**

**पदच्छेदः** –

हस्ते, लीलाकमलम्, अलके, बालकुन्दानुविद्धम्, नीताः, लोध्रप्रसवरजसा, पाण्डुताम्, आनने, श्रीः, चूडापाशे, नवकुरबकम्, चारु, कर्णे, शिरीषम्, सीमन्ते, च, त्वदुपगमजम्, यत्र, नीपम्, वधूनाम् ।

**अन्वयः** –

यत्र (अलकायां ) वधूनां हस्ते लीलाकमलम्, अलके बालकुन्दानुविद्धम्, लोध्रप्रसवरजसा पाण्डुतां नीता आननश्रीः, चूडापाशे नवकुरबकम्, कर्णे चारु शिरीषम्, सीमन्ते च त्वदुपगमजं नीपम् ।

**तात्पर्यम्-**

हे जलद ! यत्रालकायां कामिनीनां करे कमलम्, कुन्तलेषु नवकुन्दग्रथनम्, मुखे लोध्रपुष्पप्रलेपः, केशकलापे नवकुरबकं, कर्णे शिरीषं, मस्तककेशवीथ्यां कदम्बकुसुमं च समं सर्वर्तुस्थितिज्ञानं समुत्पादयति, तामलकां याहि ॥ २ ॥

**आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तैः**

**नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।**

**नाप्यन्यस्मात्प्रणयकलहाद्विप्रयोगपपत्तिः**

**वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥ ३॥**

**पदच्छेदः-**

आनन्दोत्थम्, नयनसलिलम्, यत्र, न, अन्यैः निमित्तैः, न अन्यः, तापः, कुशुमशरजात्, इष्टसंयोगसाध्यात् , न, अपि, अन्यस्मात्, प्रणयकलहात्, विप्रयोगोपपत्तिः, वित्तदेशानाम्, न, च, खलु, वयः, यौवनात्, अन्यत्, अस्ति ।

**अन्वयः –**

यत्र ( अलकायां ) वित्तेशानां नयनसलिलम् आनन्दोत्थम् अन्यैः निमित्तैः न, इष्टसंयोगसाध्यात् कुसुमशरजात् अन्यः तापः न प्रणयकलहात् अन्यत्र विप्रयोगोपपत्तिः अपि न, यौवनात् अन्यत् च वयः न खलु अस्ति !

**तात्पर्यम्-**

यत्रालकायां यक्षाणामानन्दोत्थमेव नेत्रजलं, कामोद्भत एव मनस्तापः, प्रणयकलह एव प्रियया विप्रयोगः यौवनं विहाय नान्यद्दश्यश्च वर्त्तते, तामलकां याहि ।

**यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि**
**ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।**
**आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं**
**त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ४॥**

**पदच्छेदः-**

यस्याम्, यक्षाः, सितमणिमयानि, एत्य, हर्म्यस्थलानि, ज्योतिश्छायाकुसुमरचितानि, उत्तमस्त्रीसहायाः, आसेवन्ते, मधु, रतिफलम्, कल्पवृक्षप्रसूतम्, त्वद्गम्भीरध्वनिषु, शनकैः, पुष्करेषु , आहतेषु ।।

**अन्वयः** –

यस्याम् (अलकायां ) यक्षाः उत्तमस्त्रीसहायाः सितमणिमयानि ज्योतिश्छायाकुसुमरचनानि हर्म्यस्थलानि एत्य त्वद्गम्भीरध्वनिषु पुष्करेषु शनकैः आहतेषु कल्पवृक्षप्रसूतं रतिफलं मधु आसेवन्ते ।

**तात्पर्यम्** –

हे जलद ! यत्रालकायां ललितस्त्रीसहिता यक्षाः स्फटिकमणिमयानि ताराप्रतिबिम्बपुष्परचनाशालीनि हर्म्यस्थलान्यारुह्य त्वद्गम्भीरध्वनिषु पुष्करेषु मन्दमन्दमाहतेषु सत्सु कल्पतरूद्भवं रतिफलाख्यं मध्यमासेवन्ते, तां याहि ।

**मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भिः**

**मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।**

**अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः**

**संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ५॥**

**पदच्छेदः-**

मन्दाकिन्याः, सलिलशिशिरैः, सेव्यमानाः, मरुद्भिः, मन्दाराणाम्, अनुतटरुहाम्, छायया, वारितोष्णाः, अन्वेष्टव्यैः ,कनकसिकतामुष्टिनिक्षेपगूढैः, सङ्क्रीडन्ते, मणिभिः, अमरप्रार्थिताः, यत्र, कन्याः ॥

**अन्वयः** -

यत्र ( अलकायां ) मन्दाकिन्याः सलिलशिशिरैः मरुद्भिः सेव्यमानाः, अनुतटरुहां मन्दाराणां छायया वारितोष्णाः अमरप्रार्थिताः कन्याः कनकसिकतामुष्टिनिक्षेपगूढैः अन्वेष्टव्यैः मणिभिः संक्रीडन्ते।

**तात्पर्यम्** –

हे जलद ! यत्र सुरप्रार्थिताः सुन्दर्यो यक्षकन्या, मन्दाकिन्यास्तटे तज्जलेन शिशिरैः पवनैः सेव्यमानाः सत्यस्तीररुहां मन्दाराणां छायया शामितातपाश्च सत्यः स्वर्णरेणुकासु मणिं निक्षिप्य तदन्वेषणक्रीडां क्रीडन्ति, तामलकां थाहि ।

**नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां**
**क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।**
**अर्चिष्टुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्**
**ह्रीमूढानां भवति विफलप्रेरणचूर्णमुष्टिः ॥ ६॥**

**पदच्छेदः** -

नीवीबन्धोच्छ्वसितशिथिलम्, यत्र, बिम्बाधराणाम्, क्षौमम्, रागात्, अनिभृतकरेषु, आक्षिपत्सु, प्रियेषु, अर्चिस्तुङ्गान्, अभिमुखम्, अपि, प्राप्य, रत्नप्रदीपान्, ह्रीमूढानाम्, भवति, विफलप्रेरणा, चूर्णमुष्टिः ।।

**अन्वयः** –

यत्र ( अलकायां ) अनिभृतकरेषु प्रियेषु नीवीबन्धोच्छ्वसितशिथिलं क्षौमं रागात् आक्षिपत्सु ह्रीमूढानां बिम्बाधराणां चूर्णमुष्टिः अर्चिस्तुङ्गान् रत्नप्रदीपान् अभिमुखं प्राप्य अपि विफलप्रेरणा भवति ।

**तात्पर्यम्** –

हे जलद ! यत्र, प्रियतमैः कामादपहृतवस्त्राः कामिन्यो लज्जिताः सत्यः संमुखस्थितान् रत्नप्रदीपान् चूर्णमुष्टिप्रक्षेपैः निर्वापयितुं न समर्था भवन्ति ।

**नेत्रा नीताः सततगतिना यद्विमानाग्रभूमीः**

**आलेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः ।**

**शङ्कास्पृष्टा इव जलमुचस्त्वादृशा जालमार्गैः**

**धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ७॥**

**पदच्छेदः**–

नेत्रा, नीता, सततगतिना, यद्विमानाग्रभूमीः, आलेख्यानाम्, स्वजलकणिकादोषम्, उत्पाद्य, सद्यः, शङ्कास्पृष्टाः, इव, जलमुचः, त्वादृशाः, जालमार्गैः, धूमोद्गारानुकृतिनिपुणाः, जर्जराः, निष्पतन्ति ॥

**अन्वयः** –

नेत्रा सततगतिना यद्विमानाग्रभूमीः नीताः त्वादृशाः जलमुचः आलेख्यानां स्वजलकणिकादोषम् उत्पाद्य सद्यः शङ्कास्पृष्टाः इव धूमोद्गारानुकृतिनिपुणाः जर्जराः यन्त्रजालैः निष्पतन्ति ।

**तात्पर्यम्** –

हे जलद ! यथा केनचिदन्तःपुरसंचारवता पुंसा गूढवृत्या रहस्यभूमिं प्रापितास्तत्र स्त्रीणां व्यभिचारदोषमुत्पाद्य सद्यः शङ्कातङ्कितचित्ता धृतवेषान्तरा जारजनाः क्षुद्रमार्गैर्निष्क्रामन्ति, तथा पवनेन यासु प्रासादोपरिभूमिकासु प्रापितास्तासु वारिकणैः सच्चित्रेषु दोषमुत्पाद्य शङ्कास्पृष्टा इव त्वादृशा वारिमुचो गवाक्षरन्ध्रैर्निर्गच्छन्ति, तामलकां याहि ।

**यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानां**

**अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।**

**त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे**

**व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ८॥**

**पदच्छेदः-**

यत्र, स्त्रीणाम्, प्रियतमभुजालिङ्गनोच्छ्वासितानाम्, अङ्गग्लानिम्, सुतजनिताम्, तन्तुजालावलम्बाः, त्वत्संरोधापगमविशदैः, चन्द्रपादैः, निशीथे, व्यालुम्पन्ति, स्फुटजललवस्यन्दिनः, चन्द्रकान्ताः ।

**अन्वयः –**

यत्र ( अलकायां ) निशीथे त्वत्संरोधापगमविशदैः इन्दुपादैः तन्तुजालावलम्बाः स्फुटजललवस्यन्दिनः चन्द्रकान्ताः प्रियतमभुजोच्छ्वासितालिङ्गितानां स्त्रीणां सुरतजनिताम् अङ्गग्लानिं व्यालुम्पन्ति ।

**तात्पर्यम् –**

हे जलद ! यत्र निशीथे चन्द्रकिरसंपर्कात् स्रवन्तः प्रासादोपरितनभाग-स्थिततन्तुजालस्थचन्द्रकान्तमणयः प्रियतमभुजदृढालिङ्गनादिव्यापारैः क्लान्तानां कामिनीनां निधुवनश्रमं दूरीकुर्वन्ति, तामलकां याहि ॥

**अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठैः**

**उद्गायद्भिर्धनपतियशः किंनरैर्यत्र सार्धम् ।**

**वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया**

**बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥ ९॥**

**पदच्छेदः** -

अक्षय्यान्तर्भवननिधयः, प्रत्यहम्, रक्तकण्ठैः, उद्गायद्भिः, धनपतियशः, किन्नरैः, यत्र, सार्धम्, वैभ्राजाख्यम्, विबुधवनितावारमुख्यासहायाः, बद्धालापाः ,बहिरुपवनम्, कामिनः ,निर्विशन्ति ।

**अन्वयः** –

यत्र (अलकायाम्) अक्षय्यान्तर्भवननिधयः विबुधवनितावारमुख्यासहायाः बद्धालापाः कामिनः प्रत्यहं रक्तकण्ठैः धनपतियशः उद्गायद्भिः किंनरैः सार्धं वैभ्राजाख्यं बहिरुपवनं निर्विशन्ति ।

**तात्पर्यम्** -

हे जलद ! यत्र देवाङ्गनाद्वितीया अक्षय्यधनिनः कामिनो धनेश्वरयशोगायकैः किंनरैः सह चैत्ररथाख्यं बाह्योद्यानं समाश्रयन्ति (तामलकां याहि )॥

**गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः**

**पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।**

**मुक्ताजालैः स्तनपरिसरश्छिन्नसूत्रैश्च हारैः**

**नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥ १० ॥**

**पदच्छेदः -**

गत्युत्कम्पात्, अलकपतितैः, यत्र, मन्दारपुष्पैः, पत्रच्छेदैः, कनककमलैः, कर्णविभ्रंशिभिः, च, मुक्ताजालैः, स्तनपरिसरच्छिन्नसूत्रैः, च, हारैः, नैशः, मार्गः, सवितुः, उदये, सूच्यते, कामिनीनाम् ।

**अन्वयः –**

यत्र ( अलकायां ) कामिनीनां नैशः मार्गः सवितुः उदये ( सति ) गत्युत्कम्पात् अलकपतितैः मन्दारपुष्पैः, पत्रच्छेदैः, कर्णविभ्रंशिभिः च कनककमलैः, मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैः हारैः च सूच्यते ।

**तात्पर्यम् –**

हे जलद ! यत्रालकायां पथि निपतितैः केशस्थितमन्दारपुष्पकर्णाभूषण-स्वर्णकमलद्वारमौक्तिकादिभिः सूर्योदये सत्यभिसारिकाणां रात्रिगमनमार्गो ज्ञाप्यते तामलकां याहि ॥ ॥

**सारः**

अस्मिन् खण्डे आदौ कालिदासस्य चरित्रवर्णनं कृतम्। ततः परम् उत्तरमेघस्थप्रथमदशश्लोकाः पाठ्यन्ते। तत्र यक्षः स्वप्रियायै सन्देशं प्रेषयितुं मेघं अलकापुरीं प्रेषयति। तत्र अलकापुर्याः वर्णनं यक्षेण कृतं विद्यते बहुभिः श्लोकैः। तेषां सारस्तु इत्थं भवति -

“हे मेघ! यस्यामलकायां रमणीयस्त्रियः चित्रशालाः नृत्यसंगीताय प्रताडितमृदङ्गाः मणिखचितभूमयः अभ्रङ्कषाः देवालयाः सन्ति। ते च तडित्वन्तम् इन्द्रधनुषायुक्तं त्वां यथाक्रमं तुलनां कर्तुं समर्थाः सन्ति । हे मेघ ! यथा स्त्रीणां हस्ते कमलपुष्पं शरदृतौ शोभते, शिशिरर्तौ लोध्रपुष्पं, हेमन्तर्तौ कुन्दपुष्पम्, चूडापाशे वसन्तर्तौ नवकुरबकपुष्पम्, ग्रीष्मे शिरीषपुष्पम्, वर्षर्तौ कदम्बपुष्पम् । एतानि अलकापुरीस्त्रीणामङ्गेषु शोभन्ते । यस्यामलकायां यक्षाः स्फटिमणिनिमितानि नक्षत्रप्रतिबिम्बरूपैः पुष्पैः सज्जीकृतानि सौधशिखराण्येत्य त्वद्गम्भीरवध्वनिषु वाद्यभाण्डेषु शनैः शनैः प्रताडितेषु कल्पवृक्षोत्पन्नं रतिफलनामकं मद्यमासेवन्ते। यत्रालकायां देवयाचिताः आकाशगङ्गायाः जलशीतलैः पवनैः सेव्यमानाः तीरोत्पन्नमन्दारवृक्षाणां छायया अपसारितातपाः यक्षकुमार्यः यक्ष बालुकामुष्टिप्रक्षेपगुप्तैः अन्वेष्टव्यैः रत्नैः सङ्क्रीडन्ते । चञ्चलहस्तेषु प्रियतमेषु नीवीबन्धत्रुटितशिथिलं वस्त्रं कामवशात् आहरत्सु लज्जाविमूढानां बिम्बाधराणां कुङ्कुमादिचूर्णमुष्टिः मयूखोन्नतान् रत्नदीपान् प्राप्यापि निष्फलवेगा भवति ।

यत्र त्वादृशाः मेघाः प्रेरकेण वायुना सप्तभूमिकभवनप्रासादस्य उपरि नीताः चित्रान् निजजवसंस्पर्शैः दूषयित्वा सद्यः भीता इव धूमोद्गीर्णानुकरणचतुराः जीर्णाः सन्तः गवाक्षमार्गैः निष्पतन्ति। यस्यामलकायां रात्रौ त्वदावरणविरहेण निर्मलैः चन्द्रकान्तैः स्पष्टजललवस्राविणः सूत्रसमूहैः निमितजालैः धारिताः चन्द्रकान्तमण्यः दयितबाहोः आलिङ्गनशिथिलानां वनितानां संभोगेत्पन्नं शरीरपीडाम् अपकुर्वन्ति । अलकायां यस्यां गृहाभ्यन्तरे अपरिमितसङ्गृहीतसम्पत्तयः कामिनः अप्सराभिः सह वार्तालापं कुर्वन्तः कुबेरकीर्तिं मधुरतारस्वरैः उद्गायद्भिः किम्पुरुषैः सह प्रत्यहं वैभ्राजनामकस्य बाह्योद्यानस्य उपभोगं कुर्वन्ति । यस्यामलकायाम् अभिसारिकाणां रात्रिपन्थाः सूर्योदये सति गमनकाले चञ्चलेन पूर्णकुन्तलध्वस्तैः मन्दारकुसुमैः, मन्दारकिसलयैः श्रोत्रच्युतैः स्वर्णपद्मैः मौक्तिकसरैः कुचप्रदेशेषु विच्छिन्नतन्तुभिः मैक्तिकस्रग्भिश्च सूच्यते। यस्यामलकायां कामदेवः स्वसुहृत्प्रेम्णा शङ्करशरीरेण वसन्तं ज्ञात्वा प्रायः भीत्या भ्रमरमौकिकं च धारयति । तस्य व्यापारस्तु भ्रूभङ्गसहितप्रक्षिप्तदृष्टिभिः कामिजनेष्वनिर्मोघैः पटुविलासिनीविलासैः निष्पन्नो भवति” इति।

## बोधप्रश्नाः

1. ललितविनताः स्त्रियः कुत्र भवन्ति?
2. अलकायां वधूनां हस्ते किं भवति?
3. अलकायां उत्तमस्त्रीसहायाः के?
4. अलकायां कुमार्यः कैः क्रीडन्ते?
5. केन विमानाग्रभूमीः नीताः?

## शब्दावली

1. ललितविनताः
2. शिरीषम्
3. यक्षाः
4. रतिफलम्
5. मानाग्रभूमीः

## सन्दर्भग्रन्थः

1. मेघदूतम्- सञ्जीविनीव्याख्यासमेतम्, निर्णयसागरमुद्रणालयः, बंबई, 1922

## सहायकग्रन्थाः

1. मेघदूतम्- सञ्जीविन्यादिव्याख्याचतुष्टयोपेतम्, चौखम्बा संस्कृतसंस्थानम्, वाराणसी, वि.2059

2. मेघदूतम्- R.D. Kamarkar, chowkhamba vidyabhavan , Varanasi,2009.

## बोधप्रश्नोत्तराणि

1. अलकापुर्याम्
2. लीलाकमलम्
3. यक्षाः
4. मणिभिः
5. नेत्रा वायुना

## अभ्यासप्रश्नाः

1. सर्वे श्लोकाः कण्ठस्थिकरणीयाः
2. अस्य खण्डस्य सारः संक्षेपेण लेखनीयः
3. सर्वेषां श्लोकानां पदच्छेदादीन् विलिख्य तात्पर्यं विवृणुत

# खण्डः २

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. पदच्छेदः
    2. अन्वयः
    3. तात्पर्यम्
- सारः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्य खण्डस्य विषयः तावत् उत्तरमेघे ११ श्लोकात् २० श्लोकपर्यन्तभागः। पूर्वप्रस्तुतम् अलकापुरीवर्णनमेव अत्रापि भवति। तथाहि- अलकायां मन्मथः कामिजनान् अमोघैः स्त्रीविभ्रमैः पीडयति इति वर्णनमारब्धम्। ततः तत्र कल्पवृक्षः अस्ति तस्मादेव श्रृङ्गावस्तूनि आयान्ति इति वर्णितम्।

अनन्तरं यक्षः स्वगृहस्य चिह्नानि मेघस्य ज्ञानार्थं प्रख्यापयति , तथाहि- तत्र गृहे एका वापी अस्ति, तस्याः तीरे क्रीडापर्वतः विद्यते, तत्र क्रीडापर्वते वृक्षयोः दोहः भवति। तद्वृक्षयोः मध्ये मयूरः अधितिष्ठति इति। एतादृशचिह्नैः ज्ञातव्यं मम गृहमिति मेघाय कथयति यक्षः।अन्ते यक्षप्रियायाः मेघस्य कृते परिचयं कारयति यक्षः।

## उद्देश्यम्

- श्रृङ्गाररसविषये ज्ञानं भवति
- विप्रलम्भाख्यश्रृङ्गारस्य गुणाः ज्ञायन्ते
- विविधपदानां परिचयो भवति
- सन्देशस्य महत्वं ज्ञातुं शक्यते
- ऐतिहासिकविषयेषु ज्ञानं प्राप्नोति

**मत्वा देवं धनपतिसखं यत्र साक्षाद् वसन्तं**

**प्रायश्चापं न वहति भयान् मन्मथः षट्पदज्यम् ।**

**सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघैः**

**तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ११॥**

**पदच्छेदः –**

मत्वा, देवम्, धनपतिसखम्, यत्र, साक्षात्, वसन्तम्, प्रायः, चापम्, न, वहति, भयात्, मन्मथः, षट्पदज्यम् , सभ्रूभङ्गप्रहितनयनैः, कामिलक्ष्येषु, अमोघैः, तस्यारम्भः, चतुरवनिताविभ्रमैः, एव, सिद्धः ॥

**अन्वयः –**

यत्र ( अलकायां) मन्मथः धनपतिसखं देवं साक्षात् वसन्तं मत्वा भयात् षट्पदज्यं चापं प्रायः न वहति; तस्य आरम्भः सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येषु अमोघैः चतुरवनिताविभ्रमैः एव सिद्धः ।

**तात्पर्यम्-**

हे जलद ! यत्रालकायां मदनः साक्षान्निवसन्तं हरं वीक्ष्य तद्भयेन भृङ्गमौर्वीकं स्वं बिभर्ति, किन्तु चतुरवनितानां सभ्रूमन्नं कटाक्षैरेव तत्कार्यं निष्पादयति, तामलकां पाहि ॥

**वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं**

**पुष्पोभ्देदं सह किसलयैर्भूषणानां विकल्पान् ।**

**लाक्षारागं चरणकमलन्यासयोग्यं च यस्यां**

**एकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥ १२॥**

**पदच्छेदः-**

वासः, चित्रम्, मधु, नयनयोः, विभ्रमादेशदक्षम्, पुष्पोद्भेदम्, सह, किसलयैः, भूषणानाम्, विकल्पान्, लाक्षारागम्, चरणकमलन्यासयोग्यम्, च, यस्याम्, एकः, सूते, सकलम्, अबला, मण्डनम्, कल्पवृक्षः ।

**अन्वयः –**

यस्याम् (अलकायां ) चित्रं वासः, नयनयोः विभ्रमादेशदक्षं मधु, किसलयैः सह पुष्पोद्भेदम्, भूषणानां विकल्पम्, चरणकमलन्यासयोग्यं लाक्षारागं च सकलम् अबलामण्डनम् एकः कल्पवृक्षः सूते ।

**तात्पर्यम्-**

हे जलद ! यत्रालकायां प्रतिवेश्मस्थितः एकः कल्पवृक्ष एव कामिनीनां कृते चित्रवस्त्रमधु-सपल्लवपुष्पोद्भेदभूषणलाक्षारागाङ्गरागादि चतुर्विधं समस्तमबलामण्डनं जनयति, तां याहि ॥

**तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं**

**दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।**

**यस्योपान्ते कृतकतनयः कान्तय वर्धितो मे**

**हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥ १३॥**

**पदच्छेदः–**

तत्र, आगारम्, अनन्यतिन्हान्, उत्तरेण, अस्मदीयम्, दूरात्, लक्ष्यम्, सुरपतिधनुः, चारुणा, तोरणेन, यस्य, उपान्ते, कृतकतनयः, कान्तया, वर्धितः, मे, हस्तप्राप्यस्तबकनमितः, बालमन्दारवृक्षाः ।

**अन्वयः –**

तत्र धनपतिगृहात् उत्तरेण त्वदमरधनुश्चारुणा तोरणेन दूरात् लक्ष्यम् अस्मदीयम् अगारं यस्य उद्याने मे कान्तया वर्धितः कृतकतनयः हस्तप्राप्यस्तबकनमितः बालमन्दारवृक्षः ( अस्ति ) ।

**तात्पर्यम्-**

हे जलद ! तत्रालकायां कुबेरभवनादुत्तरस्यां दिशि इन्द्रचापवच्चारतोरणाङ्कितं मदीयं भवनं वर्त्तते । यस्य प्राकारान्तः पार्श्वदेशे मत्प्रियया सुतनिर्विशेषं वर्द्धितो बालमन्दारवृक्षोऽभिज्ञानसूचको वर्त्तते ।

**वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा**

**हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।**

**यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं**

**न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ १४॥**

**पदच्छेदः –**

वापी, च, अस्मिन्, मरकतशिलाबद्धसोपानमार्गाः, हैमैः, छन्ना, विकचकमलैः, स्निग्धवैदूर्यनालैः, यस्याः, तोये, कृतवसतयः, मानसम्, सन्निकृष्टम्, न, आध्यास्यन्ति, व्यपगतशुचः, त्वाम्, अपि, प्रेक्ष्य, हंसाः ।

**अन्वयः –**

अस्मिन् ( अगारे) मरकतशिलाबद्धसोपानमार्गा दीर्घवैडूर्यनालैः हैमैः विकचकमलैः स्फीता वापी च (अस्ति), यस्याः (वाप्याः) तोये कृतवसतयः हंसाः त्वां प्राप्य अपि व्यपगतशुचः (सन्तः) संनिकृष्टं मानसं न आध्यास्यन्ति ।

**तात्पर्यम्-**

हे जलद ! अपि च मद्गेहस्थायामतिनिर्मलसलिलायां वैदूर्यनालैः स्वर्णकमलैश्छन्नायां मरकतमणिमयसोपानमार्गायां वाप्यां विहरन्तो हंसास्त्वामागतं निरीक्ष्यापि मानसं नोत्कण्ठया स्मरिष्यन्ति ।

**तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः**

**क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।**

**मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण**

**प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ १५॥**

**पदच्छेदः –**

तस्याः, तीरे, रचितशिखरः, पेशलः, इन्द्रनीलः, क्रीडाशैलः, कनककदलीवेष्टनप्रेक्षणीयः, मद्गेहिन्याः, प्रियः, इति, सखे, चेतसा, कातरेण, प्रेक्ष्य, उपान्तस्फुरिततडितम्, त्वाम्, तम्, एव, स्मरामि ।

**अन्वयः –**

तस्याः (वाप्याः ) तीरे पेशलैः इन्द्रनीलैः विहितशिखरः कनककदलीवेष्टनप्रेक्षणीयः क्रीडाशैलः ( अस्ति ), ( हे ) सखे, उपान्तस्फुरिततडितं त्वां प्रेक्ष्य मद्गेहिन्याः प्रिय इति कातरेण चेतसा तम् एव स्मरामि ।

**तात्पर्यम्-**

हे जलद ! तस्या वाप्यास्तटेऽतिमनोहरः कनककदकौमण्डित इन्द्रनीलमणिमयशिखरः क्रीडाशैलो वर्त्तते, तडिद्विलाससहितं त्वां संप्रति निरीक्ष्य तमेव मद्गेहिनीप्रियं शैलं स्मरामि ।

**रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः**

**प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।**

**एकः सख्यास्तव सह मया वामपादाभिलाषी**

**काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥ १६ ॥**

**पदच्छेदः-**

रक्ताशोकः, चलकिसलयः, केसरः, च, अत्र, कान्तः, प्रत्यासन्नौ, कुरबकवृतेः, माधवीमण्डपस्य, एकः, सख्याः, तव, सह, मया, वामपादाभिलाषी, काङ्क्षति, अन्यः, वदनमदिराम्, दोहदच्छद्मना, अस्याः ॥

**अन्वयः** –

अत्र कुरबकवृतेः माधवीमण्डपस्य प्रत्यासन्नौ चलकिसलयः रक्ताशोकः कान्तः केसरः च (स्तः ); एकः ( अशोकः ) मया सह तव संख्याः ( दौहृदच्छद्मना ) वामपादाभिलाषी, अन्यः दौहृदछद्मना अस्याः वदनमदिरां काङ्क्षति ।

**तात्पर्यम्-**

हे जलद ! तत्र क्रीडाशैले कुरबकवृतियुक्तस्य माधवीमण्डपस्य संनिकृष्टौ रक्ताशोको बकुलश्च स्तः तत्रैकस्तव सख्या मत्प्रियाया वामचरणाघातमन्यो वदनमद्यगण्डूषं चापेक्षते ॥

**तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिः**

**मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।**

**तालैः शिञ्जावलयसुभगैर्नर्तितः कान्तया मे**

**यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ॥ १७॥**

**पदच्छेदः**

तन्मध्ये, च, स्फटिकफलका, काञ्चनी, वासयष्टिः, मूले, बद्धा, मणिभिः, अनतिप्रौढवंशप्रकाशैः, तालैः, शिञ्जावलयसुभगैः, नर्तितः, कान्तया, मे, याम्, अध्यास्ते, दिवसविगमे, नीलकण्ठः, सुहृद्, वः ।

**अन्वयः** –

तन्मध्ये च अनतिप्रौढवंशप्रकाशैः मणिभिः मूले बद्धा स्फटिकफलका काञ्चनी वासयष्टिः (अस्ति), शिञ्जावलयसुभगैः तालैः मे कान्तया नर्तितः वः सुहृत् नीलकण्ठः दिवसविगमे याम् अध्यास्ते।

**तात्पर्यम्-**

हे जलद ! रक्तशोकबकुलयोर्मध्ये स्फटिकमयपीठा मणिजटिता काञ्चनमयी वासयष्टिर्वर्तते । सायंकाले मम कान्तया शिञ्जितवलयरम्यैस्तालैर्नर्तितो मयूरो यामध्यास्ते ॥

**एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा**

**द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।**

**क्षामच्छायं भवनमधुना मद्वियोगेन नूनं**

**सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥ १८॥**

**पदच्छेदः-**

एभिः, साधो, हृदयनिहितैः, लक्षणैः, लक्षयेथाः, द्वारोपान्ते, लिखितवपुषौ, शङ्खपद्मौ, च, दृष्ट्वा, क्षामच्छायम्, भवनम्, अधुना, मद्वियोगेन, नूनम्, सूर्यापाये, न, खलु, कमलम्, पुष्यति, स्वाम्, अभिख्याम् ।

**अन्वयः –**

(हे ) साधो, हृदयनिहितैः एभिः लक्षणैः द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ दृष्ट्वा च अधुना मद्वियोगेन नूनं क्षामच्छायं भवनं लक्षयेथाः, ( तथाहि ) सूर्यापाये कमलं स्वाम् अभिख्यां न पुष्यति खलु।

**तात्पर्यम्-**

हे साधो ! जलद ! एभिः पूर्वोक्तैर्लक्षणैस्तथा मद्गृहद्वारोपान्ते चित्रितौ शङ्खपद्माख्यौ निधी दृष्ट्वा रविं विना पद्ममिव विनष्टशोभं मम वेश्म जानीथाः।

**गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः**

**क्रीडाशैले प्रथमकथिते रम्यसाणौ निषण्णः ।**

**अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं**

**खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ १९॥**

**पदच्छेदः –**

गत्वा, सद्यः, कलभतनुताम्, शीघ्रसम्पातहेतोः, क्रीडाशैले, प्रथमकथिते, रम्यसानौ, निषण्णः, अर्हसि, अन्तर्भवनपतिताम्, कर्तुम्, अल्पाल्पभासम् खद्योतालीविलसितनिभाम् विद्युदुन्मेषदृष्टिम् ।

**अन्वयः –**

( हे मेघ ), शीघ्रसंपातहेतोः सद्यः कलभतनुतां गत्वा प्रथमकथिते रम्यसानौ क्रीडाशैले निषण्णः (सन्) अल्पाल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् अन्तर्भवनपतितां कर्तुम् अर्हसि ।

**तात्पर्यम्-**

हे जलद ! करिपोततनुतुल्यां स्वां तनुं निर्माय तत्र पूर्वोक्ते क्रीडाशैले समुपविश्य मद्वेश्ममध्ये त्वमल्पाल्पप्रकाशां विद्युदुन्मेषरूपां दृष्टिं कर्तुमर्हसि ॥

**तन्वी श्यामा शिखरदशना पक्वबिम्बाधरोष्ठी**

**मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।**

**श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां**

**या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ॥ २०॥**

**पदच्छेदः-**

तन्वी, श्यामा, शिखरिदशना, पक्वबिम्बाधरोष्ठी, मध्ये, क्षामा, चकितहरिणीप्रोक्षणा, निम्ननाभिः, श्रोणीभारादलसगमना, स्तोकनम्रा, स्तनाभ्याम्, या, तत्र, स्यात्, युवतिविषये, सृष्टिः, आद्येव, धातुः ।

**अन्वयः** – तन्वी, श्यामा, शिखरिदशना, पक्वबिम्बाधरोष्ठी, मध्ये क्षामा, चकितहरिणीप्रेक्षणा, निम्ननाभिः, श्रोणीभारात् अलसगमना, स्तनाभ्यां स्तोकनम्रा, युवतिविषये धातुः आद्या सृष्टिः इव या तत्र स्यात्(तां जनीथाः) ।

## तात्पर्यम्-

हे जलद ! तत्र मद्भवने कृशाङ्गी यौवनमध्यस्था दाडिमबीजदशना, पक्वबिम्बाधरोष्ठी कृशोदरी चकितहरिणीप्रेक्षणा गभीरनाभिर्मन्दगामिनी स्तनभारेयदवनता सर्वाङ्गसुन्दरी युवतिविषये स्रष्टुराद्या सुष्टिरिव या रमगी वीक्ष्यते सैव मम प्रियेति जानीथाः ॥

## सारः

अस्मिन् खण्डे वर्णितानां विषयाणां सारः तु इत्थं भवति- तथाहि वनितानां प्रसादनविषयान् वर्णयति । यक्षस्य गृहं धनपतिकुबेरस्य गृहादुत्तरस्यां दिशि विद्यते, यस्य समीपे यक्षिण्याः दत्तकपुत्रः बालमन्दारवृक्षः अस्ति । तस्मिन् भवने मरकतमणिभिः अलङ्कृता वापी अस्ति, तंत्र हंसाः क्रीडन्ति शोकरहितेन । वाप्याः तटे विद्यमानं क्रीडापर्वतं दृष्ट्वा "तत् मम प्रियायाः प्रियः इति तां स्मरामि" । तस्मिन् क्रीडापर्वते कुरबकवृक्षवेष्टितस्य मालतीनिकुञ्जस्य चञ्चलकिसलयः रक्तशोकः मनोहरः बकुलश्च समीपस्थौ वर्तेते, तयोरेकः प्रियायाः वामचरणप्रहारम् अपरो बकुलश्च मुखमद्यञ्च काङ्क्षति, तयोर्मध्ये मरकतमणिभिः बद्धामूलस्फटिकमणिमयपीठा हाटकमयी वासयष्टिर्विद्यते, सायंकाले 'मम प्रियया शिञ्जितकङ्कणसुन्दरैः करतलवादनैः नर्तितो मयूरः भवति" । सूर्यस्य अभावात् यथा कमलपुष्पन्न शोभते तद्वत् प्रियस्य अभावात् मद्गेहमपि न शोभते । हे मेघ! शीघ्रप्रवेशार्थं य करिशुशरीरसदृशं स्वशरीरं कृत्वा पूर्ववर्णितक्रीडापर्वतशिखरे भूत्वा तडित्प्रकाशरूपदृष्टिं गृहमध्ये स्थापयितुं त्वमेव समर्थः ।"तन्वी श्यामा" इत्यनेन यक्षिणीं वर्णयति - सा एव ब्रह्मणः आद्या सृष्टिः स्यादिति वदति । ततः परं, सा तु

चक्रवाकी, सैव ममापरं जीवनमस्ति, स मम वियोगात् रात्रौ कमलस्य या दशा भवति, तथैव तस्याप्यस्तीति अहं मन्ये इति।

## बोधप्रश्नाः

1. कः कुबेरमित्रं साक्षात्कृतवान्?
2. यक्षस्य गृहं कुत्र वर्तते?
3. यक्षस्य गृहे कीदृशी वापी अस्ति?
4. वापीतीरे किमस्ति?
5. रक्ताशोकः कः अस्ति क्रीडाशैले?

## शब्दावली

1. मन्मथः
2. कृतकतनयः
3. वापी
4. इनद्रनीलैः
5. वामपादाभिलाषी

## सन्दर्भग्रन्थः

1. मेघदूतम्- सञ्जीविनीव्याख्यासमेतम्, निर्णयसागरमुद्रणालयः, बंबई, 1922

## सहायकग्रन्थाः

1. मेघदूतम्- सञ्जीविन्यादिव्याख्याचतुष्टयोपेतम्, चौखम्बा संस्कृतसंस्थानम्, वाराणसी, वि.2059

2. मेघदूतम्- R.D. Kamarkar, chowkhamba vidyabhavan , Varanasi,2009.

## बोधप्रश्नोत्तराणि

1. मन्मथः
2. धनपतिगृहात् उत्तरदिशि
3. मरकतशिलाब्द्धसोपानमार्गा हैमैः छन्ना वापी
4. क्रीडाशैलः
5. केसरः

## अभ्यासप्रश्नाः

1. सर्वे श्लोकाः कण्ठस्थिकरणीयाः
2. अस्य खण्डस्य सारः संक्षेपेण लेखनीयः
3. सर्वेषां श्लोकानां पदच्छेदादीन् विलिख्य तात्पर्यं विवृणुत

# खण्डः ३

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. पदच्छेदः
    2. अन्वयः
    3. तात्पर्यम्
- सारः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

पूर्वखण्डे यक्षपत्न्यः वर्णनमारब्धं मेघस्य परिचयाय। अस्मिन् खण्डे तस्याः एव वर्णनमनुवर्तते। तथाहि- मद्वियोगात् दुःखपरिपूर्णं जीवनं धत्ते तथा तस्याः मुखं मद्वियोगात् मालिन्येन दैन्यं भवति। एवं विरहेन कृशा भवति तथा स्वस्य अङ्के वीणां निक्षिप्य विरहगानं करोति तथा दिवा काले न पीडयेत् परन्तु

रात्रौ विरहवेदना अधिकं भवति।विरहशय्यायां अर्धचन्द्रकलाशेषामिव तनुं स्वीकृत्य स्वपिति। एवं विषयेषु द्वेषभावापन्ना सती अर्धविकसिता स्थलकमलीमिव भूमिं शेते।विरहदिवसेषु कपोलात् स्पर्शक्लेशप्रदां रूक्षां वेणीमपसारयति। ईदृशी या सैव मत्प्रिया इति अवगच्छतु इति उपदिशति। ईदृशीं मत्प्रियां प्रीणयितुं मत्सन्देशं दातुं गच्छेति मेघं प्रेषयति यक्षः।

**उद्देश्यम्**

- श्रृङ्गाररसविषये ज्ञानं भवति
- विप्रलम्भाख्यश्रृङ्गारस्य गुणाः ज्ञायन्ते
- विविधपदानां परिचयो भवति
- सन्देशस्य महत्वं ज्ञातुं शक्यते
- ऐतिहासिकविषयेषु ज्ञानं प्राप्नोति

**तां जानीथाः परिमितकथां जीवितं मे द्वितीयं**

**दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।**

**गाढोत्कण्ठा गुरुषु दिवसेष्वेषु गच्छत्सु बालां**

**जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥ २१ ॥**

**पदच्छेदः-**

तां, जानीथाः, परिमितकथाम्,जीवितम्, मे, द्वितीयम्,दूरीभूते, मयि, सहचरे, चक्रवाकीम् , इव, एकाम्, गोढोत्कण्ठा गुरुषु दिवसेषु, एषु, गच्छत्सु, बालाम्, जाताम्, मन्ये, शिशिरमथिताम्, पद्मिनीम्, वा, अन्यरूपाम्।

**अन्वयः** – सहचरे मयि दूरीभूते ( सहचरे दूरीभूते ) एकां चक्रवाकीम् इव परिमितकथां तां मे द्वितीयं जीवितं जानीथाः, गुरुषु एषु दिवसेषु गच्छत्सु गाढोत्कण्ठा बाला शिशिरमथिता पद्मिनी इव अन्यरूपा जाता (इति) मन्ये ।

**तात्पर्यम्-**

हे जलद ! प्रियतमप्रवियुक्तां चक्रवाकीमिव शिशिरमथितां पद्मिनीमिव वा मयि सहचरे दूरीभूते सति पूर्वविपरीताकारां तां बालामहं तर्कयामि ॥

**नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया**
**निःष्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।**
**हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वाद्**
**इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥ २२॥**

**पदच्छेदः** –

नूनम्, तस्याः, प्रबलरुदितोच्छूननेत्रम्, प्रियायाः, निःश्वासानाम्, अशिशिरतया, भिन्नवर्णाधरोष्ठम्, हस्तन्यस्तम्, मुखम्, असकलव्यक्तिलम्बालकत्वात्, इन्दोः, दैन्यम्, त्वदनुसरणक्लिष्टकान्तेः विभत ।

**अन्वयः** –

प्रबलरुदितोच्छूननेत्रं, बहूनां निःश्वासानाम् अशिशिरतया भिन्नवर्णाधरोष्ठं, हस्तन्यस्तं, लम्बालकत्वात् असकलव्यक्ति तस्याः मुखं त्वदुपसरणक्लिष्टकान्तेः इन्दोः दैन्यं नूनं बिभर्ति ।

**तात्पर्यम्-** हे जलद ! इदानीं, मद्वियोगेन प्रियाया अतिरुदितोच्छ्वसितनेत्रमुष्णनिश्वासवशाद् विवर्णाधरोष्ठं हस्तन्यस्तं मुखं त्वदावरणात्क्षीणकान्तेश्चन्द्रमसो दीनदशां धारयतीति तर्कयामि ॥

**आलोके ते निपतति पुरा सा बलिव्याकुला वा**

**मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।**

**पृच्छन्ती वा मधुरवचनां शारिकां पञ्जरस्थां**

**कच्चित् भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥ २३॥**

**पदच्छेदः-**

आलोके, ते, निपपति, पुरा, सा, बलिव्याकुला, वा, मत्सादृश्यम्, विरहतनु, वा, भावगम्यम्, लिखन्ती, पृच्छन्ती, वा, मधुरवचनाम्, सारिकाम्, पञ्जरस्थाम्, कच्चित्, भर्तुः, स्मरसि, रसिके, त्वम्, हि, तस्य, प्रिया, इति ।

**अन्वयः –**

सा बलिव्याकुला वा, विरहतनु भावगम्यं मत्सादृश्यं लिखन्ती बा, पञ्जरस्थां सारिकां (हे ) रसिके, भर्तुः स्मरसि कच्चित् त्वं हि तस्य प्रिया इति मधुरवचनं पृच्छन्ती वा ते आलोके पुरा निपतति ।

**तात्पर्यम्-**

हे जलद ! सा मत्प्रिया देवताराधनव्यापृता वा, मदाकारसाम्यं लिखन्ती वा सारिकां 'त्वं तस्य हि प्रियेति कच्चिन्मप्रियस्मृतिं करोषी'ति पृच्छन्ती वा ते दृक्पथं गमिष्यति ॥

**उत्सङ्गे वा मलिनवसने सोम्य निक्षिप्य वीणां**

**मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।**

**तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथं चिद्**

**भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती ॥ २४॥**

**पदच्छेदः—**

उत्सङ्गे, वा, मलिनवसने, सौम्य, निक्षिप्य, वीणाम्, मद्गोत्राङ्कम्, विरचितपदम्, गेयम्, उद्गातुकामा, तन्त्रीम्, आर्द्राम्, नयनसलिलैः, सारयित्वा, कथञ्चित्, भूयोभूयः, स्वयम्, अपि, कृताम्, मूर्च्छनाम्, विस्मरन्ती ।

**अन्वयः –**

(हे) सौम्य, मलिनवसने उत्सङ्गे वीणां निक्षिप्य मद्गोत्राङ्कं विरचितपदं गेयम् उद्गातुकामा नयनसलिलैः आर्द्राः तन्त्रीः कथंचित् सारयित्वा भूयः भूयः स्वयम् अधिकृतां मूर्च्छनां विस्मरन्ती वा ( सा ते आलोके पुरा निपतति ) ।

**तात्पर्यम्-**

हे जलद ! अपि च सा मत्प्रिया निजाङ्के वीणां संस्थाप्य मनान्माङ्कं गीतं गातुकामा तत्कालनिपतितैर्नेत्रजलैराद्रां वीणां कथंचित् करेण प्रमृज्य स्वयमपि पूर्वं कृतामपि मूर्च्छनां पुनः पुनर्विस्मरन्ती वा ते दृक्पथं गमिष्यति ॥

**शेषान् मासान् विरहदिवसप्रस्थापितस्यावधेर्वा**
**विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।**
**(संयोगं) मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती**
**प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ २५॥**

**पदच्छेदः –**

शेषान्, मासान् ,विरहदिवसस्थापितस्य, अवधेः, वा, विन्यस्यन्ती, भुवि, गणनया, देहलीदत्तपुष्पैः, मत्सङ्गम्, वा, हृदयनिहतारम्भम्, आस्वादयन्ती, प्रायेण, एते, रमरणविरहेषु, अङ्गनानाम्, विनोदाः ॥

**अन्वयः –**

विरहदिवसस्थापितस्य अवधेः शेषान् मासान् देहलीमुक्तपुष्पैः गणनया भुवि विन्यस्यन्ती वा, हृदयरचितारम्भं संयोगम् आस्वादयन्ती वा ( ते आलोके पुरा निपतति ) प्रायेण अङ्गनानां रमणविरहेषु एते विनोदाः ।

**तात्पर्यम्-**

हे जलद ! विरहदिवसादारभ्य निश्चितस्यावधेरवशिष्टान् मासान् देहल्यां पुष्पाणि संस्थाप्य गणनां विदधती, भावनया मत्सम्भोगरससमास्वादयन्ती वा मत्प्रिया ते दृक्पथं गमिष्यति, यतः प्रायशः प्रियविरहेषु कामिनीनामेते विनोदा भवन्ति ॥

**सव्यापारामहनि न तथा पीडयेन्मद्वियोगः**

**शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।**

**मत्संदेशैः सुखयितुमलं पश्य साध्वीं निशीथे**

**तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥ २६॥**

**पदच्छेदः –**

सव्यापाराम्, अहनि, न, तथा, पीडयेत्, मद्वियोगः, शङ्के, रात्रौ, गुरुतरशुचम्, निर्विनोदाम्, सखीम्, ते, मत्सन्देशैः, सुखयितुम्, अलम्, पश्य, साध्वीम्, निशीथे, ताम्, उन्निद्राम्, अवनिशयनाम्, सौधवातायनस्थः ।

**अन्वयः** –

अहनि सव्यापारां (ते सखीं) विप्रयोगः तथा न पीडयेत् रात्रौ निर्विनोदां ते सखीं गुरुतरशुचं शङ्के । अतः निशीथे उन्निद्राम् अवनिशयनां साध्वीं तां मत्संदेशैः सुखयितुं सद्मवातायनस्थः (सन् ) पश्य ।

**तात्पर्यम्-**

हे जलद ! अह्नि पूर्वोक्तवलिचित्रलेखनादिव्यापारव्यापृतां मत्प्रियां मद्वियोगस्तथा न पीडयेद् यथा निशि । अतस्त्वं निद्रारहितां भूशायिनीं तां पतिव्रतामर्द्धरात्रे मत्संदेशैः सुखय ॥

**आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां**
**प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।**
**नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या**
**तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥ २७॥**

**पदच्छेदः** –

आधिक्षामाम्, विरहशयने, सन्निषण्णैकपार्श्वां, प्राचीमूले ,तनुम्, इव, कलामात्रशेषाम्, हिमांशोः, नीता, रात्रिः, क्षणः, इव, मया, सार्धम्, इच्छारतैः, या, ताम्, एव, उष्णैः, विरहमहतीम्, अश्रुभिः, यापयन्तीम् ।

**अन्वयः** –

आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां प्राचीमूले कलामात्रशेषां हिमांशोः तनुम् इव ( स्थिताम् ), या रात्रिः मया सार्धम् इच्छारतैः क्षणम् इव नीता ताम् एव विरहमहतीम् उष्णैः अश्रुभिः यापयन्तीम् (तां पश्य ) ।

**तात्पर्यम्-**

हे जलद ! मनोव्यथया क्षीणां विरहशयने एकपार्श्वेन कृतशयनां सुरतरात्रिस्मरणं विदधतीमश्रूणि स्रावयन्तीं मत्प्रियां सन्देशैः सुखितां कुरु ॥

**पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्**

**पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।**

**चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं**

**साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥ २८॥**

**पदच्छेदः-**

पादान् ,इन्दोः, अमृतशिशिरान्, जालमार्गप्रविष्टान्, पूर्वप्रीत्या, गतम्, अभिमुखम्, सन्निवृत्तम्, तथैव, चक्षुः, खेदात्, सलिलगुरुभिः,पक्ष्मभिः, छादयन्तीम्, साभ्रे, अह्नि, इव, स्थलकमलिनीम्, न, प्रबुद्धाम्, न, सुप्ताम् ।

**अन्वयः** –

जालमार्गप्रविष्टान् अमृतशिशिरान् इन्दोः पादान् पूर्वप्रीत्या अभिमुखं गतं तथा एव संनिवृत्तं चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिः छादयन्तीं साभ्रे अह्नि नप्रबुद्धां नसुप्तां स्थलकमलिनीम् इव ( स्थितां तां पश्य ) ।

**तात्पर्यम्-**

हे जलद! गवाक्षमार्गेणागतेषु चन्द्ररश्मिषु प्राक्तनसंस्कारवशात्तत्र प्राप्तां दृष्टिं सत्वरमेव निवर्त्तयन्तीं भृशं रोदनं विदधतीं मेघच्छन्ने दिवसे स्थलकमलिनीमिव न प्रबुद्धां न प्रसुप्तां मत्प्रियां सन्देशैः सुखितां विधेहि ।

**निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं**

**शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम् ।**

**मत्संभोगः कथमुपनयेत् स्वप्नजोऽपीति निद्रां**

**आकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥ २९॥**

**पदच्छेदः-**

निःश्वासेन, अधरकिसिलयक्लेशिना, विक्षिपन्तीम्, शुद्धस्नानात्, परुषम्, अलकम्, नूनम्, आागण्डलम्बम्, मत्संभोगः, कथम्, उपनयेत्, स्वप्नजः, अपि, इति, निद्राम्, आकांक्षन्तीं, नयनसलिलोत्पीडरुद्धावकाशाम् ।

**अन्वयः –**

शुद्धस्नानात् परुषं नूनम् आगण्डलम्बम् अलकम् अधरकिसलयक्लेशिना निःश्वासेन विक्षिपन्तीम्, स्वप्नजः अपि मत्संयोगः कथमुपनमेत् इति नयनसलिलोत्पीडरुद्धावकाशां निद्राम् आकाङ्क्षन्तीम् ( तां पश्य ) ।

**तात्पर्यम्-**

हे जलद ! दीर्घनिश्वासैरागण्डलम्विनो रूक्षांश्चूर्णकुन्तलान् विक्षिपन्तीं स्वप्नजन्यमपि संभोगं प्राप्तुकामां निद्रामाकाङ्क्षन्तीं मत्प्रियां संदेशैः सुखितां विधेहि ॥

**आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा**

**शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।**

**स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं**

गण्डाभोगात् कठिनविषमामेकवेणीं करेण ॥ ३० ॥

**पदच्छेदः –**

आद्ये, बद्धा, विरहदिवसे, या, शिखा, दाम, हित्वा, शापस्य, अन्ते, विगलितशुचा, ताम्, मया, उद्वेष्टनीयाम्, स्पर्शक्लिष्टाम्, अयमितनखेन, असकृत्, सारयन्तीम्, गण्डाभोगात्, कठिनविषमाम्, एकवेणीम्, करेण ।

**अन्वयः –**

आद्ये विरहदिवसे दाम हित्वा या शिखा बद्धा शापस्य अन्ते विगलितशुचा मया उद्वेष्टनीयां स्पर्शाक्लिष्टां कठिनविषमाम् एकवेणीम् तां अयमितनखेन करेण गण्डाभोगात् असकृत् सारयन्तीम् ( तां पश्य ) ।

**तात्पर्यम्-**

हे जलद ! आद्ये विरहदिवसे या मया बद्धा विरहावसाने च मयैव मोचनीया तां रूक्षचूर्णकुन्तलामेकवेणीं करेण गण्डस्थलादपसारयन्तीं मत्प्रियां सन्देशैः सुखितां विधेहि ।

**सारः**

अस्मिन् खण्डे यक्षपत्न्याः विरहतापः एवं वर्णितः यक्षेण - मद्वियोगात् अत्यधिकरोदनात् तस्याः अक्षिणी कान्तहीनमृगाङ्क इव स्यात्। सा मम प्रिया नित्यनैमित्तिक देवपूजायां संलग्ना भवति वा उत मम वियोगात् खिन्ना भूत्वा पञ्जरस्थमधुरभाषिणीं प्रति "हे रसिके ! स्वामिनं स्मरसि वा ?" इति पृच्छति? । सा च मलिनवस्त्रधरा प्रिया स्वाङ्के वीणां संस्थाप्य वादनसमये मद्वियोगशोकात् आरोहणावरोहणक्रमं विस्मृतवती भवेत् । सा विरहरिखन्नमनसा देहलीदत्तपुष्पैः शेषान्मासान् गणयती स्यात्,

मद्वियोगपीडमनस्विनी श्रान्ता सा निद्रायां भूयात्, सा द्रष्टव्या, सा मुकुलितस्थलकमलिन्या ः समाना स्यात् । इदानीं प्रियवियोगात् सा स्नानादिवेषभूषणाधिकं न कृतवती भवेत् । शापात् पूर्वं यदा वेणीपरिष्कारं कृतवती तथैव अधुनापर्यन्तं स्यात् । शापशोकादनन्तरं वेण्यलङ्कारं न कृतवतीति चिन्तयामास यक्षः। दुर्बला, परित्यक्ताङ्लङ्कारं बहुशः महत्कष्टेन तल्पमध्यस्थापितं कोमलशरीरं धारयन्ती सा अश्रुभिः रोदयिष्यति, प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा इति मेघस्य सविधे अवदत् यक्षः।

## बोधप्रश्नाः

1. यक्षपत्नीं कथं जानीथाः?
2. यक्षपत्नी कथं आस्ते?
3. यक्षप्रिया किं उत्संगे निक्षिप्य गानं करोति?
4. पूर्वानुभता रात्रिः यक्षेण सार्धं इच्छारतैः कथं नीताः?
5. साभ्रे अह्नि यक्षपत्नी कथं भवतीति वर्णितम्?

## शब्दावली

1. गाढोत्कण्ठम्
2. सारिकाम्
3. तन्त्रीम्
4. पक्ष्मभिः
5. निश्श्वासेन

## सन्दर्भग्रन्थः

1. मेघदूतम्- सञ्जीविनीव्याख्यासमेतम्, निर्णयसागरमुद्रणालयः, बंबई, 1922

## सहायकग्रन्थाः

1. मेघदूतम्- सञ्जीविन्यादिव्याख्याचतुष्टयोपेतम्, चौखम्बा संस्कृतसंस्थानम्, वाराणसी, वि.2059
2. मेघदूतम्- R.D. Kamarkar, chowkhamba vidyabhavan , Varanasi,2009.

## बोधप्रश्नोत्तराणि

1. चक्रवाकीमिव
2. बलिव्याकुला
3. वीणाम्
4. क्षणः इव
5. न प्रबुद्धां न सुप्ताम् स्थलकमलिनीमिव

## अभ्यासप्रश्नाः

1. सर्वे श्लोकाः कण्ठस्थिकरणीयाः
2. अस्य खण्डस्य सारः संक्षेपेण लेखनीयः

3. सर्वेषां श्लोकानां पदच्छेदादीन् विलिख्य तात्पर्यं विवृणुत

# खण्डः ४

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. पदच्छेदः
    2. अन्वयः
    3. तात्पर्यम्
- सारः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्मिन् खण्डेऽपि यक्षपत्न्याः विरहः वर्णितः। तथाहि- विरहेण कृशां मत्प्रियां दृष्ट्वा अवश्यं त्वं(मेघः) रोदिष्यसि यतोहि मया या विरहदशा वर्णिता सा तस्याः यथार्थस्वभावः एव नतु अतिशयोक्तिः। अनन्तरं मेघस्य सविधे वदति यक्षः - तस्याः नेत्रं भवदागमनं ज्ञात्वा चञ्चलनीलकमलशोभासादृश्यम् एष्यति एवं तस्याः वामजघने स्फुरणं भविष्यति। यदा भवान् गच्छति तदा सा निद्राणा भवति चेत् तदा

स्वप्नात् न मोचनीया इति। ततः परं कया रीत्या तया सह संभाषणं कर्तव्यमिति मेघमुपदिशति। तथाहि- तव वल्लभस्य सन्देशं गृहीत्वा आगतोऽस्मि इति उक्त्वा वल्लभस्य मम वृत्तान्तः श्रावणीयः सा च सावहिता श्रोष्यति। मत्कुशलं आदौ श्रावणीयमनन्तरं तस्याः कुशलं प्रष्टव्यम्। विरहे यक्षोऽपि अश्रुपूर्णः सन् कष्टमनुभवति इति वदतु । एवम रीत्या मेघः यक्षेण उपदिष्टः।

## उद्देश्यम्

- श्रृङ्गाररसविषये ज्ञानं भवति
- सन्देशः कथं देयः इति जानन्ति
- विविधपदानां परिचयो भवति
- सन्देशस्य महत्वं ज्ञातुं शक्यते
- ऐतिहासिकविषयेषु ज्ञानं प्राप्नोति

**सा संन्यस्ताभरणमबला पेशलं धारयन्ती**

**शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।**

**त्वामप्यस्त्रं नवजलमयं मोचयिष्यत्यवश्यं**

**प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ३१ ॥**

## पदच्छेदः–

सा, संन्यस्ताभरणम्, अबला, पेशलम्, धारयन्ती, शय्योत्सङ्गे, निहितम्, असकृत्, दुःखदुःखेन, गात्रम्, त्वाम्, अपि, अस्त्रम्, नवजलमयम्, मोचयिष्यति, अवश्यम्, प्रायः, सर्वः, भवति, करुणा, वृत्तिः, आर्द्रान्तरात्मा ।

**अन्वयः -**

अबला संन्यस्ताभरणम् असकृत् दुःखदुःखेन शय्योत्सङ्गे निहितं पेलवं गात्रं धारयन्ती सा त्वाम् अपि नवजलमयम् अत्रम् अवश्यं मोचयिष्यति, प्रायः आर्द्रान्तरात्मा सर्वः करुणावृत्तिः भवति ।

**तात्पर्यम्-**

हे जलद ! भूषणरहितं विरहशोकेनातिकृशं मृदुशरीरं कृच्छ्रेण धारयन्ती सा मत्प्रिया स्वकीयदुरवस्थाप्रदर्शनात् त्वामपि नवनवारिमयमश्रु मोचयिष्यति यतः प्रायेणार्द्रचेताः सर्वोऽपि जनः सदयो भवति ॥

**जाने सख्यास्तव मयि मनः संभृतस्नेहमस्माद्**

**इत्थंभूतां प्रथमविरहे तामहं तर्कयामि ।**

**वाचालं मां न खलु सुभगंमन्यभावः करोति**

**प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत् ॥ ३२॥**

**पदच्छेदः –**

जाने, संख्याः, तव, मयि, मनः, सम्भृतस्नेहम्, अस्मात्, इत्थंभूताम्, प्रथमविरहे, ताम्, अहम्, तर्कयामि, वाचालम्, माम्, न, खलु, सुभगंमन्यभावः, करोति, प्रत्यक्षम्, ते, निखिलम्, अचिरात्, भ्रातः, उक्तम्, मया, यत् ।।

**अन्वयः –**

तव सख्याः मनः मयि संभृतस्नेहं जाने, अस्मात् (कारणात्) प्रथमविरहे अहं ताम् इत्थंभूतां तर्कयामि, सुभगंमन्यभावः मां वाचालं न करोति खलु, ( हे ) भ्रातः, मया यत् उक्तं ( तत् ) निखिलम् अचिरात् ते प्रत्यक्षं ( भविष्यति ) ।

**तात्पर्यम्-**

हे जलद ! मत्प्रियाया मनो मत्स्नेहप्रवणमित्यहं जाने अतोऽननुभूतचरविरहे तां पूर्वोक्तावस्थामापन्नां तर्कयामि । नाहं सुभगमानित्वेन वाचालोऽस्मि, मत्कथितमचिरात्ते प्रत्यक्षं भवेत् इति॥

**रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं**

**प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।**

**त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या**

**मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ ३३॥**

**पदच्छेदः –**

रुद्धापाङ्गप्रसरम्, अलकैः, अञ्जनस्नेहशून्यम्, प्रत्यादेशात्, अपि, च, मधुनः, विस्मृतभ्रूविलासम् , त्वयि आसन्ने, नयनम्, परिस्पन्दि, शङ्के, मृगाक्ष्याः, मीनक्षोभात्, चलकुवलयश्रीतुलाम्, एष्यति, इति ।

**अन्वयः –**

अलकैः रुद्धापाङ्गप्रसरम् अञ्जनस्नेहशून्यम् अपि च मधुनः प्रत्यादेशात् विस्मृतभ्रूविलासं त्वयि आसन्ने उपरिस्पन्दि मृगाक्ष्याः नयनं मनिक्षोभात् चलकुवलयश्रीतुलाम् एष्यति इति शङ्के ।

**तात्पर्यम्-**

हे जलद ! त्वयि निकटवर्त्तिनि सति विरहिण्या मत्प्रियाया अञ्जनशून्यं भ्रूविलासवर्जितं वामनेत्रं शुभसूचकोपरिस्फुरणशालि चलपद्मशोभां धारयिष्यति ॥

**वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयैः**

**मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।**

**संभोगान्ते मम समुचितो हस्तसंवाहनानां**

**यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ ३४॥**

**पदच्छेदः –**

वामः, च, अस्याः, कररुहपदैः, मुच्यमानः, मदीयैः, मुक्ताजालम्, चिरपरिचितम्, त्याजितः, दैवगत्या, सम्भोगान्ते, मम, समुचितः, हस्तसंवाहनानाम्, यास्यति, ऊरुः, सरसकदलीस्तम्भगौरः, चलत्वम् ।

**अन्वयः –**

मदीयैः कररुहपदैः मुच्यमानः, चिरपरिचितं मुक्ताजालं दैवगत्या त्याजितः, संभोगान्ते मम हस्तसंवाहनानां समुचितः सरसकदलीगर्भगौरः अस्याः वामः ऊरुः च चलत्वं यास्यति ।

**तात्पर्यम्-**

हे जलद ! मत्सन्देशहरे त्वयि संनिकृष्टे सति मत्प्रियाया इदानीं मस्कृतनखक्षतशून्यो मौक्तिकमयकटिभूषणविरहितो वाम ऊरुः शुभसूचकं स्पन्दनं धारयिष्यति ॥

**तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्याद्**

**अन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।**

**मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथं चित्**

**सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ३५॥**

**पदच्छेदः –**

तस्मिन्, काले, जलद ,यदि, सा, लब्धनिद्रासुखा, स्यात्, अन्वास्य, एनाम्, स्तनितविमुखः, याममात्रम्, सहस्व, मा भूत्, अस्याः, प्रणयिनि, मयि, स्वप्नलब्धे, कथञ्चित्, सद्यः, कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ।

**अन्वयः –**

(हे ) जलद, तस्मिन् काले यदि सा लब्धनिद्रासुखा स्यात् एनाम् अन्वास्य स्तनितविमुखः (सन् ) याममात्रं सहस्व; अस्याः प्रणयिनि जने ( मयि ) कथंचित् स्वप्नलब्धे गाढोपगूढं सद्यः कण्ठच्युतभुजलताग्रन्थि मा भूत् ।

**तात्पर्यम्-**

हे जलद ! स्वदुपसर्पणसमये निशीथे यदि मत्प्रिया कथंचन निद्रिता स्यात्तर्हि याममात्रं गर्जितविमुखः सन् प्रतीक्षस्व स्वप्नदशायामधिगते मद्गाढालिङ्गनेऽन्तरायं मा विधेहि ।

**तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन**

**प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।**

**विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे**

**वक्तुं धीरस्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ३६॥**

**पदच्छेदः –**

ताम्, उत्थाप्य, स्वजलकणिकाशीतलेन, अनिलेन, प्रत्याश्वस्ताम्, समम्, अभिनवैः, जालकैः, मालतीनाम्, विद्युद्गर्भः, स्तिमितनयनाम्, त्वत्सनाथे, गवाक्षे, वक्तुम्, धीरः, स्तनितवचनैः, मानिनीम्, प्रक्रमेथाः ।

**अन्वयः –**

एनां स्वजलकणिकाशीतलेन अनिलेन उत्थाप्य अभिनवैः मालतीनां जालकैः समं प्रत्याश्वस्ताम् त्वत्सनाथे गवाक्षे स्तिमितनयनां मानिनीं (हे ) धीर, विद्युद्गर्भः स्तनितवचनः ( सन् ) वक्तुं प्रक्रमेथाः ।

**तात्पर्यम्-**

हे जलद ! स्वजलबिन्दुशीतलेनानिलेन समाश्वस्तां तामुत्थाप्य त्वद्युक्ते गवाक्षेनिश्चलनेत्रां तां गर्जितरूपैर्वचोभिर्वक्तुं प्रारभेथाः ॥

**भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं**

**तत्संदेशैहृदयनिहितैरागतं त्वत्समीपम् ।**

**यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां**

**मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ ३७॥**

**पदच्छेदः-**

भर्तुः, मित्रम्, प्रियम्, अविधवे, विद्धि, माम्, अम्बुवाहम्, तत्सन्देशैः, हृदयनिहितैः, आगतम्, त्वत्समीपम्, यः, वृन्दानि, त्वरयति, पथि, श्राम्यताम्, प्रोषितानाम्, मन्द्रस्निग्धैः, ध्वनिभिः, अबला, वेणिमोक्षोत्सुकानि ।।

**अन्वयः –**

( हे) अविधवे, मां भर्तुः प्रियं मित्रं मनसि निहितैः तत्संदेशैः त्वत्समीपम् आगतम् अम्बुवाहं विद्धि; यः ( अम्बुवाहः ) मन्द्रस्निग्धैः ध्वनिभिः अबलावेणिमोक्षोत्सुकानि पथि श्राम्यतां प्रोषितानां वृन्दानि त्वरयति ।

## तात्पर्यम्-

हे जलद ! त्वं मत्प्रियां प्रति प्रथममित्थं कथयेः “हे सुवासिनि ! यः प्रोषितान् प्रियान् स्वस्वभवनं गन्तुं त्वरयति तं त्वत्प्रियस्य सखायं मां जलदं जानीहि । तत्सन्देशं गृहीत्वा त्वत्समीपागतोऽस्मि” इति।

**इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा**

**त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभव्य चैव ।**

**श्रोष्यत्यस्मात् परमवहिता सौम्य सीमन्तिनीनां**

**कान्तोदन्तः सुहृदुपनतः सङ्गमात्किंचिदूनः ॥ ३८॥**

## पदच्छेदः -

इति, आख्याते, पवनतनयम्, मैथली, इव, उन्मुखी, सा, त्वाम्, उत्कण्ठोच्छ्वसितहृदया, वीक्ष्य, सम्भाव्य, च, एवम्, श्रोष्यति, यस्मात्, परम्, अवहिता, सौम्य, सीमन्तिनीनाम्, कान्तोदन्तः, सुहृदुपनतः, सङ्गमात्, किंचित्, ऊनः ॥

## अन्वयः –

इति आख्याते पवनतनयं मैथिली इव सा उन्मुखी उत्कण्ठोच्छ्वसितहृदया त्वां वक्ष्य संभाव्य च अस्मात् परम् अवहिता ( सती ) श्रोष्यति एव; हे सौम्य सीमन्तिनीनां सुहृदुपनतः कान्तोदन्तः संगमात् किंचित् ऊनः।

**तात्पर्यम्-**

हे जलद ! इत्थं कथिते सति जानकी हनुमन्तमिव त्वां दृष्ट्वा सत्कृत्य च मत्प्रिया सोत्कण्ठं सन्देशमाकर्णयिष्यति, मित्रेणानीतो वल्लभवृत्तान्तो वधूनां कृते सङ्गमसदृशो भवति ॥

**तामायुष्मन् मम च वचनादात्मनः चोपकर्तुं**

**ब्रूयादेवं तव सहचरो रामगिर्याश्रमस्थः ।**

**अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः**

**पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ ३९॥**

**पदच्छेदः-**

ताम्, आयुष्मन्, मम, च, वचनात्, आत्मनः, च, उपकर्तुम्, ब्रूयात्, एवम्, तव, सहचरः, रामगिर्याश्रमस्थः, अव्यापन्नः, कुशलम्, अबले, पृच्छति, त्वाम्, वियुक्तः, पूर्वाभाष्यम्, सुलभविपदाम्, प्राणिनाम्, एतत्, एव ।

**अन्वयः –**

( हे ) आयुष्मन्, मम वचनात् च आत्मनः उपकर्तुं च ताम् एवं ब्रूयाः— (हे) अबले, तव सहचरः रामगिर्याश्रमस्थः अव्यापन्नः नियुक्तः त्वां कुशलं पृच्छति; सुलभविपदां प्राणिनाम् एतद् एव पूर्वाशास्यम्।

**तात्पर्यम्-**

हे जलद ! त्वं तां मत्प्रियामित्थं कथयेः "यच्चित्रकूटपर्वताश्रमस्थितस्त्वत्प्रियः सकुशलो वर्त्तते, त्वत्कुशलं च स पृच्छति अनायासविपद्गतानां कृते एतदेव प्रथममवश्यं प्रष्टव्यम् ॥

**अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं**

**साम्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।**

**उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती**

**सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥ ४० ॥**

**पदच्छेदः –**

अङ्गेन, अङ्गम्, प्रतनु, तनुना, गाढतप्तेन, तप्तम्, साम्रेण द्रुतम्, अविरतोत्कण्ठम्, उत्कण्ठितेन, उष्णोच्छ्वासम् समधिकतरोच्छ्वासिना, दूरवर्ती, सङ्कल्पः, तैः, विशति, विधिना, वैरिणा, रुद्धमार्गः ।

**अन्वयः –**

दूरवर्ती विधिना वैरिणा रुद्धमार्गः तनुना गाढतप्तेन साम्रेण उत्कण्ठितेन समधिकखरोच्छ्वासिना अङ्गेन, तनु तप्तम् अस्रद्रुतम् अविरतोत्कण्ठम् उष्णोच्छ्वासं च अङ्गं तैः संकल्पैः विशति ।

**तात्पर्यम्-**

हे जलद ! विधिवशाद् रुद्धमार्गो दूरस्थितस्ते वल्लभः संप्रति कृशेन प्रकामतप्तेन साश्रुणोत्कण्ठितेन दीर्घोच्छ्वासयुक्तेन च स्वाङ्गेन तवापि च तथाविधमङ्गमनोव्यापारैरेकीकरोति "इति कथयेः ।

**सारः**

यक्षपत्न्याः विरहः पूर्वखण्डोदितः पुनः अनुवर्तते। तथाहि- आदौ विरहेण कृशां मत्प्रियां दृष्ट्वा अवश्यं त्वं(मेघः) रोदिष्यसि इति वदति यक्षः यतोहि मया या विरहदशा वर्णिता सा तस्याः यथार्थस्वभावः एव नतु अतिशयोक्तिः, अतः तां मदीयसन्देशं प्रेषय। अनन्तरं मेघस्य सविधे वदति यक्षः - तस्याः नेत्रं भवदागमनं ज्ञात्वा अपाङ्गगतिभ्रूसञ्चालनैः शून्यमपि प्रियायाः वामनेत्रं परिस्पन्दमानं उपरिभागे चञ्चलनीलकमलशोभासादृश्यम् एष्यति इत्युक्तम्। एवं मेघे सन्निकृष्टे सति संभोगान्ते ममहस्तपीडनायोग्ये तस्याः वामजघने स्फुरणं भविष्यति। ततः उक्तम् यदा भवान् गच्छति तदा सा

निद्रायां भवति चेत् तदा सा मदालिङ्गमना भवति अतः स्वप्नात् सा न मोचनीया इति। ततः परं कया रीत्या तया सह संभाषणं कर्तव्यमिति मेघमुपदिशति।तथाहि- तामुत्थाप्य विद्युद्गर्भः सन् धीरवचनैः तां बोधय। हे जीवद्भर्तृके! प्रवासिजनानां गृहगमनाय नोदिताऽहं तव वल्लभस्य सन्देशं गृहीत्वा आगतोऽस्मि इति वदतु।अनन्तरं वल्लभस्य मम वृत्तान्तः श्रावणीयः यतोहि स्त्रीणां कृते पतिवृत्तान्तः रुचिकरः भवति सा च सावहिता श्रोष्यति।मत्कुशलं आदौ श्रावणीयमनन्तरं तस्याः कुशलं प्रष्टव्यम् इति च उपदेशः कृतः ।विरहे पूर्वानुभूतसंकल्पानाश्रित्य यक्षोऽपि अश्रुपूर्णः सन् कष्टमनुभवति इति श्रावय इति रीत्या मेघः यक्षेण उपदिष्टः।

## बोधप्रश्नाः

1. अबला यक्षपत्नी कं मोचयिष्यति?
2. नेत्रं मेघे आसन्ने सति कथमेष्यति?
3. मेघं दृष्ट्वा यक्षपत्नी कथं भवति?
4. यक्षः कुत्र वर्तते इति मेघेन श्रावितम्?
5. केन मार्गः रुद्धः?

## शब्दावली

1. नवजमयम्
2. सुभगंमन्यभावः
3. उपरिस्पन्दि
4. गाढोपगूढम्
5. रुद्धमार्गः

## सन्दर्भग्रन्थः

1. मेघदूतम्- सञ्जीविनीव्याख्यासमेतम्, निर्णयसागरमुद्रणालयः, बंबई, 1922

## सहायकग्रन्थाः

1. मेघदूतम्- सञ्जीविन्यादिव्याख्याचतुष्टयोपेतम्, चौखम्बा संस्कृतसंस्थानम्, वाराणसी, वि.2059
2. मेघदूतम्- R.D. Kamarkar, chowkhamba vidyabhavan , Varanasi,2009.

## बोधप्रश्नोत्तराणि

1. मेघम्
2. चलकुवलयश्रीतुलाम्
3. मैथिलीव उन्मुखी
4. रामगिर्याश्रमे
5. वैरिणा

## अभ्यासप्रश्नाः

1. सर्वे श्लोकाः कण्ठस्थिकरणीयाः
2. अस्य खण्डस्य सारः संक्षेपेण लेखनीयः
3. सर्वेषां श्लोकानां पदच्छेदादीन् विलिख्य तात्पर्यं विवृणुत

# खण्डः ५

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. पदच्छेदः
    2. अन्वयः
    3. तात्पर्यम्
- सारः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्मिन् खण्डे मेघः कथं यक्षपत्न्या सह संभाषणं कुर्यादिति यक्षः उपदिशति पूर्ववदेव । तथाहि- सुदूरस्थः भवत्पतिः स्वसन्देशं मन्मुखात् कारयति इति वदतु। ततः एवं वदति- त्वत्सदृशप्रतीयमानेषु पदार्थेषु तव सादृश्यं नास्ति अतः वञ्चितोऽहं इति पत्नीं सम्बोधयति। ततः दैवात् चित्रेऽपि प्रियासमागमो न भवति यक्षस्य तथा स्वप्नकालेऽपि स्वप्नगतां पत्नीं वीक्ष्य तदालिङ्गनाय हस्तं प्रसारयतीति वर्णनं

भवति। एवं रीत्या वर्णने समाप्ते सति मासचतुष्टयानन्तरं शापशान्तिः भवति अतः ततः परमेव मदागमनं इति सूचयति यक्षः। एवं रीत्या कथिते सति सन्देशं समापयति यक्षः।

## उद्देश्यम्

- श्रृङ्गाररसविषये ज्ञानं भवति
- विप्रलम्भाख्यश्रृङ्गारस्य गुणाः ज्ञायन्ते
- विविधपदानां परिचयो भवति
- सन्देशस्य महत्वं ज्ञातुं शक्यते
- ऐतिहासिकविषयेषु ज्ञानं प्राप्नोति

**शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्**

**कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।**

**सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्टः**

**त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ ४१ ॥**

## पदच्छेदः-

शब्दाख्येयम्, यत्, अपि, किल, ते, यः, सखीनाम्, पुरस्तात्, कर्णे, लोलः, कथयितुम्, अभूत्, आननस्पर्शलोभात्, सः, अतिक्रान्तः, श्रवणविषयम्, लोचनाभ्याम्, अदृष्टः, त्वाम्, उत्कण्ठाविरचितपदम्, ममुखेन, इदमाह।

## अन्वयः –

यः (सहचरः ) सखीनां पुरस्तात् ते आननस्पर्शलोभात् शब्दाख्येयम् अपि यत् कर्णे कथयितुं लोलः अभूत् किल, श्रवणविषयम् अतिक्रान्तः लोचनाभ्याम् अदृष्टः सः त्वाम् उत्कण्ठाविरचितपदम् इदं मन्मुखेन आह ।

## तात्पर्यम्-

हे जलद । 'यस्ते वल्लभः पुरा सखीनामग्रे शब्देनाख्येयमपि वचस्त्वत्कपोलस्पर्शलोभात् कर्णे कथयितुं लालस आसीत्, स संप्रति नेत्रकर्णयोर्विषयातीतः सन् सोत्कण्ठमुच्चारितं मन्मुखेनेदं वचोऽवोचत्' इति कथयेः ॥

**श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं**

**वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।**

**उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्**

**हन्तैकस्मिन्क्वचिदपि न ते चण्डि सादृश्यमस्ति ॥ ४२॥**

## पदच्छेदः-

श्यामासु, अंगम्, चकितहरिणीप्रेक्षणे, दृष्टिपातं, वक्त्रच्छयाम्, शशिनि, शिखिनाम्, बर्हभारेषु, केशान्, उत्पश्यामि, प्रतनुषु, नदीवीचिषु, भ्रूविलासान्, हन्त, एकस्मिन्, क्वचित्, अपि, न, ते, चण्डि, सादृश्यम् अस्ति ।

## अन्वयः –

श्यामासु अङ्गम्, चकितहरिणीप्रेक्षिते दृष्टिपातम्, शशिनि वक्त्रच्छायाम्, शिखिनां बर्हभारेषु केशान्, प्रतनुषु नदीवीचिषु भ्रूविलासान् उत्पश्यामि। हन्त, ( हे ) चण्डि, क्वचित् अपि एकस्थं ते सादृश्यं न अस्ति।

**तात्पर्यम्-**

हे जलद ! 'प्रियङ्गुलतास्वङ्गं, चकितहरिणीविलोकने दृक्पातं, चन्द्रमसि कान्तिं, मयूरबर्हसमूहेषु केशान्, सरित्कल्लोलेषु भ्रविलासांश्चोत्पश्यामि, किन्तु हन्त क्वचिदपि त्वत्सादृश्याभावान्मे मनो न निर्वृतिं गच्छति' इति कथयेः।

**त्वामालिख्य प्रणयकुपिता धातुरागैः शिलायां**

**आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।**

**अस्त्रैस्तावन् मुहुरुपचितैर्दृष्टिरालुप्यते मे**

**क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥ ४३॥**

**पदच्छेदः-**

त्वाम्, आलिख्य, प्रणयकुपिताम्, धातुरागैः, शिलायाम्, आत्मानम्, चरणपतितम्, यावत्, इच्छामि, कर्तुम्, अस्त्रैः, तावत्, मुहुः, उपचितैः, दृष्टिः, आलुप्यते, मे, क्रूरः, तस्मिन्, अपि, न, सहते, सङ्गमम्, नौ, कृतान्तः ॥

**अन्वयः –**

प्रणयकुपितां त्वां धातुरागैः शिलायाम् आलिख्य आत्मानं ते चरणपतितं कर्तुं यावत् इच्छामि तावत् मुहुः उपचितैः अस्त्रैः मे दृष्टिः आलभ्यते, क्रूरः कृतान्तः तस्मिन् अपि नौ संगमं न सहते।

**तात्पर्यम्-**

हे जलद ! 'स्नेहक्रुद्धां ते प्रतिकृतिं धातुरागैः शिलापट्टे निर्माय यावदहमात्मानं प्रतिकृतिरूपेण ते चरणपतितं लेखितुमिच्छामि तावदेव पुनः पुनः प्रवृद्धैरश्रुभिर्मे दृष्टिराच्छाद्यते, तर्कये, क्रूरः कृतान्तस्तस्मिन्नप्यावयोः सङ्गमं न सहते' इति कथयेः ॥

**मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोः**

**लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु ।**

**पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां**

**मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥ ४४॥**

**पदच्छेदः–**

माम्, आकाशप्रणिहितभुजम्, निर्दयाश्लेषहेतोः, लब्धायाः, ते, कथम्, अपि, मया, स्वप्नसन्दर्शनेषु, पश्यन्तीनाम्, न, खलु, बहुशः, न, स्थली, देवतानाम्, मुक्तास्थूलाः, तरुकिसलयेषु, अश्रुलेशाः, पतन्ति ।

**अन्वयः –**

स्वप्नसंदर्शनेषु मया कथम् अपि लब्धायाः ते निर्दयाश्लेषहेतोः आकाशप्रणिहितभुजं मां पश्यन्तीनां स्थलीदेवतानां मुक्तास्थूलाः अश्रुलेशाः तरुकिसलयेषु बहुशः न पतन्ति ( इति ) न खलु ॥

**तात्पर्यम्-**

हे जलद ! 'तव स्वप्नसंदर्शनेषु त्वद्गाढालिङ्गनार्थं प्रसारितभुजमपि विफलं मां वीक्षमाणानां वनदेवतानां तरुपल्लवेष्वश्रुबिन्दवो निपतन्त्येव' इति कथयेः ।

**भित्त्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां**

**ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।**

**आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः**

**पूर्वस्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ ४५॥**

**पदच्छेदः-**

भित्वा, सद्यः, किसलयपुटान्, देवदारुद्रुमाणाम्, ये, तत्, क्षीरस्रुतिसुरभयः, दक्षिणेन, प्रवृत्ताः, आलिङ्ग्यन्ते, गुणवति, मया, ते, तुषाराद्रिवाताः, पूर्वम्, स्पृष्टम्, यदि, किल, भवेत्, अङ्गम्, एभिः ,तव, इति ।

**अन्वयः –**

देवदारुमाणां किसलयपुटान् सद्यः भित्त्वा तत्क्षीरस्रुतिसुरभयः ये दक्षिणेन प्रवृत्ताः ते तुषाराद्रिवाताः ( हे ) गुणवति, पूर्वम् एभिः तव अङ्गं स्पृष्टं भवेत् यदि किल इति मया आलिङ्ग्यन्ते ।

**तात्पर्यम्-**

हे जलद ! हे गुणवति देवदारुवृक्षपल्लवपुटस्रुतक्षीरगन्धशालिनो ये दक्षिणमारुतास्तैस्त्वदङ्गं पूर्वं स्पृष्टं भवेदिति बुद्ध्या मया ते तुषाराद्रिवाता आश्लिष्यन्ते' इति कथयेः ।

**संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा**

**सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।**

**इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे**

**गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ ४६॥**

**पदच्छेदः-**

संक्षिप्येत, क्षणः, इव, कथम्, दीर्घयामा, त्रियामा, सर्वावस्थासु, अपि, कथम्, मन्दमन्दातपम्, स्यात्, इत्थम्, चेतः, चटुलनयने, दुर्लभप्रार्थनम्, मे, गाढोष्माभिः, कृतम्, अशरणम्, त्वद्वियोगव्यथाभिः।

**अन्वयः –**

दीर्घयामा त्रियामा कथं क्षणः इव संक्षिप्येत ? अहः अपि सर्वासु अवस्थासु कथं मन्दमन्दातपं स्यात् ? ( हे) चटुलनयने, इत्थं दुर्लभप्रार्थनं मे चेतः गाढोष्णाभिः त्वद्वियोगव्यथाभिः अशरणं कृतम् ।

**तात्पर्यम्-**

हे जलद ! 'रजन्या दीर्घप्रहरत्वाद्दिवसस्य प्रगाढातपत्वात् त्वद्वियोगव्यथाभिरशरणं मे चेतः कृतम्' इति कथयेः ।

**नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे**

**तत् कल्याणि त्वमपि नितरां मा गमः कातरत्वम् ।**

**कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा**

**नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ ४७॥**

**पदच्छेदः-**

ननु ,आत्मानम्, बहु,विगणयन्, आत्मना, एव, अवलंबे, तत्, कल्याणि, त्वम्, अपि, नितराम्, मा, गमः, कातरत्वम् , कस्य, अत्यन्तम्, सुखम्, उपनतम्, दुःखम्, एकान्ततः, वा, नीचैः, गच्छति, उपरि, च, दशा, चक्रनेमिक्रमेण ।

**अन्वयः –**

ननु बहु विगणयन् आत्मानम् आत्मना एव अवलम्बे, तत् ( हे ) कल्याणि, त्वम् अपि नितरां कातरत्वं मा गमः, कस्य एकान्तं सुखम् उपनतम् एकान्ततः दुःखं वा ? दशा चक्रनेमिक्रमेण नीचैः उपरि च गच्छति ।

## तात्पर्यम्-

हे जलद ! हे कल्याणि! शापावसाने सत्येवमेव करिष्यामीति मन स्यावर्तयन्नहमात्मनैवात्मानमवलम्बे तत्वमपि कातरभावं मा गमः, सुखदुःखे च चक्रवत् परिवर्त्तमाने स्तः, तदावयोरपि पुनः शीघ्रमेव संगमो भविष्यति' इति कथयेः ॥

**शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ**

**शेषान्मासान् गमय चतुरो लोचने मीलयित्वा ।**

**पश्चादावां विरहगुणितं तं तमात्माभिलाषं**

**निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ४८॥**

## पदच्छेदः-

शापान्तः, मे, भुजगशयनात्, उत्थिते, शांर्गपाणौ, शेषान्, मासान्, गमय, चतुरः, लोचने, मीलयित्वा, पश्चात्, आवाम्, विरहगुणितम्, तम्, तम्, आत्माभिलाषम्, निर्वेक्ष्यावः, परिणतशरच्चन्द्रिकासु, क्षपासु ।

## अन्वयः –

शार्ङ्गपाणौ भुजगशयनात् उत्थिते मे शापान्तः, अन्यान् चतुरः मासान् लोचने मीलयित्वा गमय, पश्चात् आवां विरहगणितं तं तम् एव अभिलाषं परिणतशरच्चन्द्रिकासु क्षपासु निर्वेक्ष्यावः ।

**तात्पर्यम्-**

हे जलद ! 'हे प्राणप्रिये ! नारायणे भुजगशयनादुत्थिते सति मे शापावसानो भविष्यति, अतोऽवशिष्टांश्चतुरो मासान् कथमप्यतिवाहय । पश्चादा वां शरच्चन्द्रिकामनोरमासु निशासु तं तमाभिलाषमनुविष्यावः " इति कथयेः ।

**भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे**

**निद्रां गत्वा किमपि रुदती सस्वनं विप्रबुद्धा ।**

**सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे**

**द्रूष्टः स्वप्ने कितव रमयन् कामपि त्वं मयेति ॥ ४९॥**

**पदच्छेदः –**

भूयः, च, आह, त्वम्, अपि, शयने, कण्ठलग्ना, पुरा, मे, निद्रान्, गत्वा, किम्, अपि, रुदती, सस्वनम्, विप्रबुद्धा, सान्तर्हासम्, कथितम्, असकृत्, पृच्छतः, च, त्वया, मे, दृष्टः, स्वप्ने, कितव, रमयन्, काम्, अपि, त्वम्, मया, इति ।

**अन्वयः –**

भूयः च आह - पुरा शयने मे कण्ठलग्ना त्वम् असि, निद्रां गत्वा किम् अपि सस्वरं रुदती विप्रबुद्धा, असकृत् पृच्छतः मे (हे) कितव, त्वं काम् अपि रमयन् मया स्वप्ने दृष्टः इति त्वया सान्तर्हासं कथितं च ।

**तात्पर्यम्-**

हे जलद ! 'हे प्रियतमे ! पूर्वं कदाचिन्मया सार्धमेकशय्यायां शयाना स्वप्नावस्थायां किमपि दृष्ट्वा रुदती सहसोत्थाय मत्पृष्टा सती 'स्वप्ने कयाचिदपि रमण्या सह रममाणस्त्वं मया वीक्षितोऽसि' इति कथितवती इति कथयेः ।

**एतस्मान्मां कुशलिनमभिज्ञानदानाद् विदित्वा**

**मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः ।**

**स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगाद्**

**इष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ५०॥**

**पदच्छेदः -**

एतस्मात्, माम्, कुशलिनम्, अभिज्ञानदानात्, विदित्वा, मा, कौलीनात्, चकितनयने, मयि, अविश्वासिनी, भूः, स्नेहान्, आहुः, किम्, अपि, विरहे, ध्वंसिनः, ते, तु, अभोगात्, इष्टे, वस्तुनि, उपचितरसाः, प्रेमराशीभवन्ति ।

**अन्वयः –**

एतस्मात् अभिज्ञानदानात् मां कुशलिनं विदित्वा (हे ) असितनयने, कौलीनात् मयि अविश्वासिनी मा भूः; किम् अपि विरहे स्नेहान् ह्रासिनः आहुः, ते हि अभोगात् इष्टे वस्तुनि उपचितरसाः प्रेमराशीभवन्ति ।

**तात्पर्यम्-**

हे जलद ! 'हे असितनयने ! अस्मात्प्रेषितसन्देशरूपलक्षणान्मा जीवितं बुद्ध्या 'मम परस्त्रीसङ्गमं संभाव्यः' इति लोकापवादान्मय्यविश्वासं मा कार्षीः, वियोगे प्रणयिनामिष्टप्राप्त्यमावात् तत्र स्नेहो वर्द्धत एव न तु नश्यति' - इति कथयेः ।

**आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते**

**शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।**

**साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि**

**प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ५१॥**

**पदच्छेदः–**

आश्वास्य, एवम्, प्रथमविरहोदग्रशोकाम्, सखीम्, ते, शैलात्, आशु, त्रिनयनवृषोत्खातकूटात्, निवृत्तः, साभिज्ञानप्रहितकुशलैः, तद्वचोभिः, मम, अपि, प्रातः, कुन्दप्रसवशिथिलम्, जीवितम्, धारयेथाः ।

**अन्वयः –**

प्रथमविरहे शोकदष्टाम् ते सखीम् एवम् आश्वास्य त्रिनयनवृषोत्खातकूटात् तस्मात् अद्रेः निवृत्तः (सन्) साभिज्ञानप्रहितकुशलैः तद्वचोभिः मम अपि प्रातः कुन्दप्रसवशिथिलम् जीवितं धारयेथाः ।

**तात्पर्यम्-**

हे जलद ! प्रथमविरहेण तीव्रतमदुःखवतीं मत्प्रियामित्थमाश्वास्य कैलासात्प्रतिनिवृत्तस्त्वं तत्संदेशवचनैः कुन्दप्रसवमिव दुर्बलं मम जीवितं स्थासय ॥

**कच्चित् सोम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे**

**प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।**

**निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः**

**प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ५२॥**

**पदच्छेदः –**

कच्चित्, सौम्य, व्यवसितम्, इदम्, बन्धुकृत्यम्, त्वया, मे, प्रत्यादेशात्, न, खलु, भवतः, धीरताम्, कल्पयामि , निःशब्दः, अपि, प्रदिशसि, जलम्, याचितः, चातकेभ्यः, प्रत्युक्तम्, हि, प्रणयिषु, सताम्, ईप्सितार्थक्रिया, एव ।

**अन्वयः** –

(हे ) सौम्य, इदं मे बन्धुकृत्यं त्वया व्यवसितं कच्चित्, प्रत्यादेशात् भवतः धरितां न खलु कल्पयामि । याचितः निःशब्दः अपि चातकेभ्यः जलं प्रदिशसि, सतां हि प्रणयिषु ईप्सितार्थक्रिया एव प्रत्युक्तम् ।

## तात्पर्यम्-

हे सौम्य ! इदं मे बन्धुकृत्यं 'करिष्यामीति' निश्चितं किम् ? त्वं प्रार्थितः सन् निःशब्दोऽपि चातकेभ्यो जलं ददासि, अत 'इत्थं तव विधास्यामि' इति प्रतिवचनाभावादहं त्वदङ्गीकृतिं समर्थये । सज्जनानां याचकजनेष्वभिलषितार्थप्रदानमेव प्रतिवचनं भवति ॥

**एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे**
**सौहर्दाद् वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।**
**इष्टान् देशान् विचर प्रावृषा संभृतश्रीः**
**मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ ५३॥**

**पदच्छेदः-**

एतत्, कृत्वा, प्रियम्, अनुचितप्रार्थनावर्त्मनः, मे, सौहार्दात्, वा, विधुरः, इति, वा, मयि, अनुक्रोशबुद्ध्या, इष्टान्, देशान्, जलद,विचर, प्रावृषा, संभृतश्रीः, मा, भूत्, एवं, क्षणम्, अपि, च, ते, विद्युता, विप्रयोगः।

**अन्वयः –**

( हे ) जलद, सौहार्दात् वा विधुरः इति मयि अनुक्रोशबुद्ध्या वा मे प्रार्थनात् आत्मनः अनुचितम् एतत् प्रियं कृत्वा प्रावृषा संभृतश्रीः इष्टान् देशान् विचर । (हे ) सखे, एवं क्षणम् अपि विद्युता विप्रयोगः मा भूत् ।

## तात्पर्यम्-

हे जलद ! अनुचितप्रार्थनां विदधतो मे सौहार्दाद् 'अयं दुःखी'ति वा, मयि कृपाशालित्वाद्वा इमां संदेशवहनरूपां प्रार्थनां कृपया सफलं विधाय वर्षोपचितशोकः सन्नभिलषितान् देशान् विचर एवं मादृशवत्तवापि विद्युत्पत्नीवियोगो मा भूत्।

**सारः**

अस्य खण्डस्य सारः तु एवं भवति। तथाहि आदौ मेघः कथं यक्षपत्न्या सह संभाषणं कुर्यादिति यक्षः उपदिशति पूर्ववदेव । तथाहि- तव प्रियः सुदूरस्थः सन्नपि स्वसन्देशं मन्मुखात् प्रेषयति तथाहि - तव सखीनां पुरस्तात् मुखध्वनिव्यक्तकथनयोग्यमपि वचनं कर्णे गदितुं चपलमभुत्।अतः सः त्वां एवं सन्देशं प्रेषयति इति। त्वत्सदृशप्रतीयमानेषु पदार्थेषु तव सादृश्यं नास्ति अतः वञ्चितोऽहं तैः पदार्थैः आत्मानं विनोदयितुं अभिलषितः इति पत्नीं सम्बोध्य कथयति -लतासु तवाङ्गं पश्यामि,भीतहरिणः वीक्षणे तव नेत्रं पश्यामि,शशिनि तव मुखशोभां पश्यामि, मयूरानां पिच्छेषु तव केशं पश्यामि,नदीतरङ्गेषु तव भ्रूविलासं पश्यामि, परन्तु विरहे सति कुत्रापि त्वत्सादृश्यं नास्ति इति ।ततः प्रणयकारणेन कुपितां प्रियां शमनाय धातुवर्णैः शिलायां स्वस्य चित्रं विलिख्य त्वत्चरणपतितं यदा कर्तुमिच्छामि तदा मम नेत्रं पुनः

पुनः नयनवारिभिः आच्छाद्यते, अतः दैवात् चित्रेऽपि प्रियासमागमो न भवति इति वदति यक्षः। ततः यक्षस्य तथा स्वप्नकालेऽपि स्वप्नगतां पत्नीं वीक्ष्य तदालिङ्गनाय हस्तं प्रसारयतीति वर्णनं भवति। ततः देवदारुवृक्षाणां पल्लवपुटान् तस्मिन्नेव क्षणे भित्वा तदीयक्षीरनिष्यन्दगन्धशालिनः हिमालयवायवः दक्षिणमार्गे चलन्ति। एतद्वायुना तव शरीरम् यत् पूर्वं मया स्पृष्टं तदिदानीमालिङ्ग्यते इति स्ववेदनां प्रादर्शि यक्षेण। ततः प्रियाविरहात् यक्षः दिवानिशं दुःसहां पीडामनुभवामि इति प्रतिपादयति, तथाहि- बहुकाला रात्रिः क्षण इव लघूक्रियते कथमिति न ज्ञायते सर्वं भवद्वियोगजनितमिति मन्ये। भवद्विरहबाधाभिः अनाथः सञ्जातः अहमिति वर्णितम्। ततः सुखदुःखमिश्रितोऽयं संसारः अत्र आत्यन्तिकं दुःखं सुखं व नास्ति , अतः त्वया धैर्यमवलम्बनीयमिति पत्नीं सम्बोध्य वदति।

एवं रीत्या वर्णने समाप्ते सति भुजगशयनात् विष्णोः मासचतुष्टयानन्तरं उत्थाने सति शापशान्तिः भवति अतः तावन्मासं कथंचित् नेत्रं निमील्य नय। शापशमनानन्तरं आवां यथेष्टं अभिलाषं विरहगुणितं अनुभवावः इति सूचयति यक्षः। ततः मया सह शयाना मदीया पत्नी कामपि रमणीं रमयन्तं मां दृष्ट्वा प्रबुद्धा सा मह्यं सर्वं कथितवती यत् त्वया वाच्या मद्वचनेन इति यक्षो वदति। ततः यक्षो वदति पुनः – मां स्वप्नसमाचारेण जीवितीति जानीहि, वियोगे स्नेहक्षयस्य संभावना न कार्या। विरहे सति प्रेमाधिक्यमेव भवति नतु ह्रासः इति प्रियायै वदतु इति। एवं रीत्या सन्देशे समाप्ते सति यक्षः वदति कैलासात् शीघ्रं गत्वा सन्देशं दत्वा तां आश्वासयतु इति ।अन्ते पृच्छति- किं मत्कार्यं भवति अङ्गीकृतं वा इति। भवांस्तु धीरः अतः निश्चयेन वक्तुं शक्यते यत् भवान् न तिरस्करोषि इति। तथा प्रार्थ्यते - स्नेहात् अथवा विधुर इति वा मयि अनुग्रमत्या मम सन्देशनयनरूपं कार्यं कृत्वा वर्षाकालेन इष्टान् देशान् विहर , क्षणमपि तव विद्युता मद्विरहवत् वियोगः मास्तु इति आशास्य विरमति यक्षः।

**बोधप्रश्नाः**

1. भुजगशयनस्य कस्य उत्थाने सति शापावसानो भविष्यति?

2. सखीनां वचनं कर्णे कथयितुं कथमभूत्?

3. कुत्र भ्रूविलासान् उत्पश्यामि इति यक्षोवाच?

4. क्रूरेऽपि किं न सहते कृतान्तः?

5. उपचितरसाः कुत्र प्रेमराशिभवन्ति?

## शब्दावली

1. दीर्घयामा
2. शापान्तः
3. विप्रबुद्धा
4. उपचितरसाः
5. संभृतश्रीः

## सन्दर्भग्रन्थः


1. मेघदूतम्- सञ्जीविनीव्याख्यासमेतम्, निर्णयसागरमुद्रणालयः, बंबई, 1922


## सहायकग्रन्थाः


1. मेघदूतम्- सञ्जीविन्यादिव्याख्याचतुष्टयोपेतम्, चौखम्बा संस्कृतसंस्थानम्, वाराणसी, वि.2059
2. मेघदूतम्- R.D. Kamarkar, chowkhamba vidyabhavan , Varanasi,2009.


## बोधप्रश्नोत्तराणि

1. नारायणस्य

2. लोलः

3. नदीवीचिषु, शिखीनां बर्हभारेषु च

4. संगमम्

5. इष्टे वस्तुनि

**अभ्यासप्रश्नाः**

1. सर्वे श्लोकाः कण्ठस्थिकरणीयाः

2. अस्य खण्डस्य सारः संक्षेपेण लेखनीयः

3. सर्वेषां श्लोकानां पदच्छेदादीन् विलिख्य तात्पर्यं विवृणुत

*********